# आपस्तम्ब-धर्म-सूत्राणि - विषय-विभागः①

ApastambaH

# आपस्तम्ब-धर्म-सूत्राणि - विषय-विभागः①


1. ॐ
2. +क्रियाः
    1. अध्ययनम्
        1. औचित्य-विवेकः
            1. क्वानध्यायः
            2. काल-निमित्तकम् अनध्ययनम्
            3. घटनानिमित्तम् अनध्ययनम्
                1. मृताशौचे
                2. अन्ननिमित्तम्
                3. उपप्लवे
                4. उपप्लवे नैसर्गिके
                5. सपरिहार-व्यवधानानि
            4. स्थानम्
        2. क्रमः
    2. +अर्हणम्
        1. आतिथ्यम्
            1. अतिथिः
            2. विधिः
            3. विधौ पात्रभेदात् सत्कारभेदः
            4. मधुपर्कः
            5. लोपे प्रायश्चित्तम्
            6. अनुव्रजनम्
            7. अतिथिभावः
        2. अभिवादनम्
        3. अग्नौ चर्या
            1. हविर्-विवेकः
            2. समिधि पोषणे
            3. अग्नेर् हरणम्
            4. स्थापनम्
                1. स्थालीपाकतन्त्र उल्लेखनम्
            5. पात्र-विवेकः
            6. गौरव-दर्शनम्
        4. दानम्
            1. विधिः
            2. द्रव्याणि
            3. पत्नी-पात्रम्
            4. सन्दर्भः
            5. प्रतिग्रह-पात्रता
            6. ब्राह्मण-भोजनम्
            7. अन्यत्रोक्तम्
        5. गौरव-दर्शनम्

            1. पथि अवकाश-दानम्
            2. अतिक्रमणम्
            3. भाषणे
            4. उपसर्पणे
            5. देहस्थितिः
            6. उपवेशनम्
            7. इतरेषु व्यवहारः
            8. समावृत्तस्य गुरौ
            9. यज्ञोपवीतम्
        6. सन्ध्यावन्दनम्
        7. श्राद्धम्
            1. फलम्
            2. पात्राणि
            3. कालः
            4. द्रव्याणि
            5. विधिः
            6. नित्य-श्राद्धम्, तेन श्राद्धान्त्यम्
            7. गौरसर्षप-श्राद्धम् पौष्टिकम्
            8. स्थालीपाक-श्राद्धम् पौष्टिकम्
        8. वैश्वदेवम्
            1. चोदनम्, फलम्
            2. व्रतग्रहणम्
            3. विधिः
                1. आतिथ्यम्
        9. यज्ञः
    3. भिक्षा
        1. भिक्षाग्रहणम्
        2. भिक्षा-निवेदनम्
        3. भिक्षा-कारण-परीक्षा
    4. भोजनविधिः
        1. भोजन-मात्रा
        2. भोजनस्थानम्
        3. भोजनपात्रम्
        4. भोजन-वेला
        5. विधिः
            1. अन्ते शोधनम्
        6. उच्छिष्टे
        7. भोज्यता द्रव्यजन्या
            1. उत्तमः कल्पः
            2. अभोज्येषु
            3. विपदि
        8. भोज्यता परिकरजन्या
            1. पाचक-परिवेषक-पङ्क्त्यादौ
            2. पाके

        3. दातरि
5. ब्रह्मयज्ञः
    1. विधानम्
    2. क्रमः
        1. रात्रौ
6. दीवनम्
7. लोकसङ्ग्रहः
8. मैथुनम्
    1. विधिः
    2. कालनियमाः
    3. नित्यकर्मत्वम्
    4. पात्रनियमः
    5. ऊर्ध्वरेतः-प्रशंसा-निन्दने
9. निद्रा
    1. सन्ध्या-निद्रा-प्रायश्चित्तम्
    2. दुःस्वप्ने
10. प्रयाणम्
    1. विधिः
    2. वर्जनीय-स्थानानि
    3. यानेषु
11. +शौचम्
    1. आत्मा
        1. चोदनम्, फलम्
        2. आत्मा
        3. सन्न्यास-नियमाः
        4. योग-विधिः
    2. दण्डनम्
        1. साधारण-दण्डन-विधिः
        2. ब्राह्मण-दण्डनम्
        3. स्तेये
            1. स्तेनः *(ब्रह्मस्वापहारः)*
        4. पतनीये दण्डः
        5. अगौरव-दर्शने
    3. इन्द्रिय-नियमनम्
        1. स्पर्शे
        2. गमने
        3. पादस्थितौ
        4. क्रियान्तराणि
    4. मूत्र-निष्कासनम्
        1. ष्ठेवनम्
    5. नियमाः
        1. नियमाः
        2. व्रतानि
    6. पर्व

            1. गृहस्थेषु
        7. प्राणायामः
        8. प्रायश्चित्तम्
            1. साधारण-विधिः
            2. पतनीयेषु
                1. सुरा
            3. वाग्दोषे
            4. मिथ्याधीतौ
            5. अपपात्र-संसर्गे
                1. शूद्रसेवा
            6. अन्यदोषेषु
            7. अभोज्यभक्षणे
            8. यभनमूलेषु
                1. दाम्पत्य-व्यतिक्रमः
                2. अवकीर्णी ब्रह्मचारी
                3. अनार्यागमनम् / अनार्यगमनम्
                4. परदारा-गमनम्, कुमारी-गमनम्
                5. गुरुतल्पगमनम्
            9. हत्यायाम्
                1. ब्रह्महत्या-पैशुनयोः
                2. अन्य-हत्यायाम्
                3. भ्रूणहा
                4. जनवधे
                5. प्राणिहत्यायाम्
        9. प्रयतता
            1. आवश्यकता
            2. उचिता आपः
            3. शरीरस्थितिः
            4. विधिः
12. स्नानम्
13. वाणिज्यम्
    1. वाणिज्य-वस्तुषु नियमाः
    2. कैस् सह वाणिज्यम्?
    3. कीनाशः, पशुपः
    4. पशु-दण्डनम्
    5. उञ्छवृत्तिः
14. वासः
15. वाक्-नियमनम्
    1. पावित्र्ये
    2. परुष-वचने
    3. वचन-शैल्याम्
    4. प्रशंसायाम्
    5. साक्षिवचने
    6. वादेषु

        7. सभाः
    16. वस्त्राणि
        1. द्रव्यम्
        2. यज्ञोपवीतम्
        3. विधिः
    17. विवादः
        1. निर्णेतारः
        2. साक्षि-वचनम्
        3. निर्णय-विधानम्
    18. युद्धम्
3. +पात्राणि
    1. आचार्यः
        1. वर्णः
        2. परीक्षा
        3. समावर्तने
        4. व्रतविशेषः
    2. +आश्रमः
        1. ब्रह्मचर्यम्
            1. गुरुकुले वासः, ब्रह्मचर्य-कालः
            2. वेषः
                1. मेखला
                2. दण्डः
                3. कौपीनम्/ वेष्टिः
            3. उत्तरीयम्, कम्बलः
            4. ब्रह्मचर्ये नियमाः साधारणाः
            5. अध्ययने
            6. विनोद-त्यागः
            7. आचार्यप्रमादे
            8. शुश्रूषा
            9. निद्रा
            10. समिदाधानम्
            11. भोजनम्
                1. भोजनात् परम्
                2. भोजनात् प्राक्
                3. अभोज्यम्
            12. गुरुदक्षिणा
        2. गृहस्थ-धर्मः
            1. भोजनम्
            2. जलरक्षणम्
            3. अध्ययन-गौणत्वे
            4. भृत्याः
            5. नियोगः
            6. पर्व-नियमा, मैथुन-नियमा
        3. पत्नी

         1. पत्नीत्व-सिद्धिः
         2. सहत्वम्
         3. स्त्री-व्यभिचारे
      4. समावृत्तः
         1. गुरौ गौरवदर्शने
         2. वेषः
         3. आचार्यस्य तस्मिन् वृत्तिः
      5. उपनयनम्
         1. परिचयः
         2. कालः
            1. अतिक्रान्ते काले
            2. अनुपनीतकुलस्य
      6. वानप्रस्थः
         1. अधिकारः
         2. प्रव्रजनम्
         3. विधिः
         4. भोजनम्
      7. विवाहः
         1. कन्यादाने निषेधाः
         2. विवाहप्रकाराः
         3. विवाह-विधिः
   3. पुत्रः
      1. प्रजा-प्रशंसा
      2. प्रजा-पाप-फलम्
      3. स्त्री-व्यभिचारे
   4. राजा
      1. पुर-व्यवस्था
      2. दानम्, पोषणम्
      3. आयुध-मनोरञ्जन-निरोधः
      4. रक्षा
      5. करः
      6. पशु-रक्षणम्
4. +तत्त्वानि
   1. ॐकारः
   2. अशौचम्
      1. बाल-प्रयतता
      2. अशौच-कारणानि
      3. मृताशौचम्
         1. अनध्यायः
         2. वपनम्
      4. अन्यत्रोक्तानि
      5. चौक्षता
   3. दायभागः
      1. अधिकारिणः

        2. चोदनम्
    4. धर्मः
        1. साधारण-धर्माः
        2. आश्रमाः
        3. वर्णः
            1. ब्राह्मणवृत्तिः
            2. क्षत्रिय-वृत्तिः
            3. शूद्रधर्मः
        4. सम्बद्धविषयाः
    5. धर्मे प्रमाणम्
        1. शिष्टाचारे स्मृत्यन्तरे च
        2. देश-कुलाचारेषु
        3. स्त्री-शूद्राश्च
    6. कामः
    7. पापम्
        1. कामस्यापायः
        2. अशुचिकराणि
        3. दोषाः
            1. ससङ्कल्पता
            2. पतनीयानि
        4. फलम्
    8. वेदः
        1. वेदाधिकारः
5. Appendix - +Dyugangā द्युगङ्गा
    1. Goals ध्येयानि
        1. संस्कृतानुवादः
        2. Contribution, contact
    2. वन्दनीय-वन्दना

ॐ①

## +क्रिया:①

### अध्ययनम्②

### औचित्य-विवेकः③

### क्वानध्यायः④

**1/04/12/09**— विद्यां प्रत्यनध्यायः श्रूयते न कर्मयोगे मन्त्राणाम् ९

**1/03/11/38**— यथोक्तमन्यदतः परिषत्सु ३८

**2/05/12/19**— दोषफलसंशये न तत्कर्तव्यम् १९

**2/05/12/20**— एवमध्यायानध्याये २०

## काल-निमित्तकम् अनध्ययनम्④

**1/03/09/01**— श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं {अनूक्तम् अननूक्तञ्च} प्रदोषे नाधीयीत १

**1/03/09/02**— तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेत् २

**1/03/09/03**— अर्धपञ्चमांश्चतुरो मासानित्येके ३

**1/03/11/35**— अननूक्तं चापर्तौ छन्दसो नाधीयीत ३५

**1/03/11/36**— {अननूक्तं} प्रदोषे च ३६

**1/03/11/37**— सार्वकालिकमाम्नातम् *(=अधीतम्)* {अध्येतव्यम्} ३७

**1/03/11/01**— {अनध्ययनम्} काण्डोपाकरणे चामातृकस्य १

**1/03/11/02**— काण्डसमापने चापितृकस्य २

**1/03/09/28**— अहोरात्राव् अमावास्यासु *(पूर्वेद्युश् चतुर्दशीषु चेति हरदत्तः। मनुना पूर्णिमायाम् अपि निषिद्धम्।)* २८

**1/03/10/01**— चातुर्मासीषु च १

**1/03/11/15**— सन्ध्योः १५

**1/03/11/20**— अविहितमनुवाकाध्ययनमाषाढवासन्तिकयोः *(=वसन्तोत्सवः)* २०

**1/11/32/12**— अनध्यायो निशायाम् *(=रात्रेर् मध्यभागः)* - अन्यत्र धर्मोपदेशाच् छिष्येभ्यः १२

# घटनानिमित्तम् अनध्ययनम्④

**1/03/09/18**— तदहरागतेषु च ग्रामं बाह्येषु १८

**1/03/09/19**— अपि सत्सु १९

**1/03/10/02**— वैरमणे*(=उत्सर्जने) (मृतेषु)* गुरुष्व् अष्टाक्य औपाकरण इति त्र्यहाः २

**1/03/11/06**— यत्काण्डमुपाकुर्वीत यस्य चानुवाक्यं कुर्वीत न तत्तदहरधीयीत ६

**1/03/11/07**— उपाकरणसमापनयोश्च पारायणस्य तां विद्याम् ७

**1/03/11/11**— विप्रोष्य च समध्ययनं तदहः ११

**1/03/11/12**— स्वैरिकर्मसु च १२

**1/03/11/13**— यथा पाद प्रक्षालनोत्सादनानुलेपनाणीति १३

**1/03/11/14**— तावन्तं कालं नाधीयीताध्यापयेद्वा १४

## मृताशौचे⑤

**1/03/10/03**— तथा संबन्धेषु ज्ञातिषु *(मृतेषु त्र्यहम् अनध्याय इति ब्रह्मचारिनियमः। इतरेषाम् आशौचवतां तु यावद् आशौचमनध्यायः)*३

**1/03/10/04**— मातरि पितर्य् आचार्य इति द्वादशाहाः ४

**1/03/10/10**— आचार्ये त्रीन् अहोरात्रान् इत्य् एके १०

**1/03/10/11**— श्रोत्रिय-संस्थायाम् अपरिसंवत्सरायाम् एकाम् *(रात्रिम्)* ११

**1/03/10/12**— सब्रह्मचारिणीत्य् एके १२ ...

## अन्ननिमित्तम्⑤

**1/03/10/26**— प्रदोषे च भुक्त्वा २६

**1/03/10/27**— प्रोदकयोश्च *(= भुक्त्वार्द्रयोः)* पाण्योः २७

**1/03/10/28**— प्रेतसंक्लृप्तं चान्नं भुक्त्वा सप्रदोषमहरनध्यायः २८

**1/03/10/29**— आ च विपाकात् २९

**1/03/10/30**— अश्राद्धेन तु पर्यवदध्यात् ३०

**1/03/11/03**— मनुष्यप्रकृतीनां च देवानां यज्ञे भुक्त्वेत्येके ३

**1/03/11/04**— पर्युषितैस्तण्डुलैराममांसेन च नानध्यायाः ४

**1/03/11/05**— तथौषधिवनस्पतिमूलफलैः ५

**1/03/10/25**— शुक्तं *(=पक्वं कालपाकेनाम्लं जात)* चात्मसंयुक्तम् *(=उदरस्थम्)* २५

## उपप्लवे⑤

**1/03/09/25**— गवां चावरोधे २५

**1/03/09/26**— वध्यानां च यावता हन्यन्ते २६

**1/03/10/21**— सर्वेषु च शब्दकर्मसु *(=आक्रोश-परिवादादिषु)* यत्र *(+अध्ययन-शब्देन)* संसृज्येरन् २१

**1/03/10/19**— *(बहु-)*श्व-गर्दभ-नादाः सलावृक्य्-एकसृक*(=शृगाल)*+उलूक-शब्दाः
सर्वे वादित्र-शब्दा
रोदन-गीत-सामशब्दाश् च १९

**1/03/10/20**— शाखान्तरे *(श्रूयमाणे)* च साम्नाम् अनध्यायः २०

## उपप्लवे नैसर्गिके⑤

**1/03/09/20**— संधावनुस्तनिते रात्रिम् २०

**1/03/09/21**— स्वप्नपर्यान्तं विद्युति २१

**1/03/09/22**— उपव्युषं
यावता वा कृष्णां रोहिणीम् इति,
शम्या-प्रासाद् विजानीयाद्

- एतस्मिन् काले विद्योत-माने सप्रदोषम् अहरनध्यायः २२

**1/03/09/23**— दह्रे*(=अपररात्रे तृतीयो भागः)* ऽपररात्रे*(=रात्रेस् तृतीयो भागः)* स्तनयित्नुना २३

**1/03/09/24**— ऊर्ध्वमर्धरात्रादित्येके २४

**1/03/11/08**— वायुर्घोषवान्भूमौ वा तृण संवाहो वर्षति वा यत्र धाराः प्रवहेत् ८

**1/03/11/25**— विद्युति चाभ्यग्रायां स्तनयित्नाव् अप्रायत्ये प्रेतान्ने नीहारे च मानसं परिचक्षते २५

**1/03/11/27**— विद्युत्स्तनयित्नुर्वृष्टिश्चापर्तौ यत्र संनिपतेयुस्तस्त्र्यहमनध्यायः २७

**1/03/11/28**— यावद्भूमिर्व्युदकेत्येके २८

**1/03/11/29**— एकेन द्वाभ्यां वैतेषामाकालम् २९

**1/03/11/30**— सूर्याचन्द्रमसोर्ग्रहणे भूमिचलेऽपस्वान उल्कायामग्न्युत्पाते च सर्वासां विद्यानां सार्वकालिकमाकालम् ३०

**1/03/11/31**— अभ्रं चापर्तौ सूर्याचन्द्र मसोः परिवेष इन्द्र धनुः प्रतिसूर्यमत्स्यश्च वाते पूतीगन्धे नीहारे च सर्वेष्वेतेषु तावन्तं कालम् ३१

**1/03/11/32**— मुहूर्तं विरते वाते ३२

**1/03/11/33**— सलावृक्यामेकसृक इति स्वप्नपर्यान्तम् ३३

**1/03/11/34**— नक्तं चारण्येऽनग्नावहिरण्ये वा ३४

**1/04/12/03**— अथापि वाजसनेयिब्राह्मणम् । ब्रह्मयज्ञो ह वा एष यत्स्वाध्यायस्तस्यैते वषट्कारा यत्स्तनयति यद्विद्योतते यदवस्फूर्जति यद्वातो वायति । तस्मात्स्तनयति विद्योतमानेऽवस्फूर्जति वाते वा वायत्यधीयीतैव वषट्काराणामच्छम्बट्कारायेति ३

**1/04/12/04**— तस्य शाखान्तरे वाक्यसमाप्तिः ४

**1/04/12/05**— अथ यदि वातो वा वायात् स्तनयेद् वा विद्योतेत वावस्फूर्जेद् वैकां वर्चमेकं वा यजुरेकं वा सामाभिव्याहरेद्भूर्भुवः सुवः सत्यं तपः श्रद्धायां जुहोमीति वैतत् । तेनो हैवास्यैतदहः स्वाध्याय उपात्तो भवति ५

**1/04/12/06**— एवं सत्यार्यसमयेनाविप्रतिषिद्धम् ६

**1/04/12/07**— अध्यायानध्यायं ह्युपदिशन्ति । तदनर्थकं स्याद्वाजसनेयिब्राह्मणं चेदवेक्षेत ७

**1/04/12/08**— आर्यसमयो ह्यगृह्यमानकारणः ८

## सपरिहार-व्यवधानानि⑤

**1/03/10/22**— छर्दयित्वा *(=वमित्वा)* स्वप्नान्तम् *(नाधीयीत)*। २२

**1/03/10/23**— सर्पिर्वा प्राश्य *(अधीयीत)*। २३

**1/03/09/13**— ब्रह्माध्येष्यमाणो मलवद्वाससेच्छन्संभाषितुं ब्राह्मणेन संभाष्य तया संभाषेत संभाष्य तु ब्राह्मणेनैव संभाष्याधीयीत । एवं तस्याः प्रजानिःश्रेयसम् १३

**1/03/10/13**— श्रोत्रियाभ्यागमे ऽधिजिगांसमानो ऽधीयानो वा ऽनुज्ञाप्याधीयीत १३

**1/03/10/14**— अध्यापयेद् वा १४

**1/03/10/15**— गुरुसंनिधौ चाधीहि भो इत्य् *(आत्मगतम्)* उक्त्वाधीयीत १५

**1/03/10/16**— अध्यापयेद् वा १६

**1/03/10/17—** उभयत उपसंग्रहणम् अधिजिगांसमानस्याधीत्य च १७*(5)*

**1/03/10/18—** अधीयानेषु वा यत्रान्यो व्यवेयाद् *(=मध्ये गच्छेत्)*, एतम् एव शब्दम् *(=अधीहि भोः)* उत्सृज्याधीयीत १८

# स्थानम्④

**1/03/09/04—** निगमेष्वध्ययनं वर्जयेत् ४

**1/03/09/05—** आनडुहेन वा शकृत्पिण्डेनोपलिप्तेऽधीयीत ५

**1/03/09/06—** श्मशाने सर्वतः शम्याप्रासात् ६

**1/03/09/07—** ग्रामेणाध्यवसिते क्षेत्रेण वा नानध्यायः ७

**1/03/09/08—** ज्ञायमाने तु तस्मिन्न् एव देशे नाधीयीत ८

**1/03/09/09—** श्मशानवच्छूद्र पतितौ ९

**1/03/09/10—** समानागार इत्येके १०

**1/03/09/11—** शूद्रा यां तु प्रेक्षणप्रतिप्रेक्षणयोरेवानध्यायः ११

**1/03/09/12—** तथान्यस्यां स्त्रियां वर्णव्यतिक्रान्तायां मैथुने १२

**1/03/09/14—** अन्तःशवम् १४

**1/03/09/15—** अन्तश्चाण्डालम् १५

**1/03/09/16—** अभिनिर्हृतानां तु सीम्न्यनध्यायः १६

**1/03/09/17—** संदर्शने चारण्ये १७

**1/03/09/27—** पृष्ठारूढः पशूनां नाधीयीत २७

**1/03/10/24—** पूतीगन्धः २४

**1/03/11/08—** वायुर्घोषवान्भूमौ वा तृण संवाहो वर्षति वा यत्र धाराः प्रवहेत् ८

**1/03/11/09—** ग्रामारण्ययोश्च सन्धौ ९

**1/03/11/10—** महापथे च १०

**1/03/11/16—** तथा वृक्षमारूढः १६

**1/03/11/17—** अप्सु चावगाढः १७

**1/03/11/18—** नक्तं चापावृते १८

**1/03/11/19**— दिवा चापिहिते १९

### क्रमः③

**1/03/10/17**— उभयत उपसंग्रहणम् अधिजिगांसमानस्याधीत्य च १७*(5)*

*(अन्यत्रोक्तः - उपनयनम्, स्वाध्यायः, अध्यापकः, अभिवादनम्, समावर्तनम्।)*

## +अर्हणम्②

## आतिथ्यम्③

## अतिथिः④

**2/03/06/03**— अग्निरिव ज्वलन् अतिथिरभ्यागच्छति ३

**2/03/06/04**— धर्मेण वेदानामेकैकां शाखामधीत्य श्रोत्रियो भवति ४

**2/03/06/05**— स्वधर्मयुक्तं कुटुम्बिनमभ्यागच्छति धर्मपुरस्कारो नान्यप्रयोजनः सोऽतिथिर्भवति ५

**2/03/06/06**— तस्य पूजायां शान्तिः स्वर्गश्च ६

**2/03/07/01**— स एष प्राजापत्यः कुटुम्बिनो यज्ञो नित्यप्रततः १

**2/03/07/02**— योऽतिथीनामग्निः स आहवनीयो यः कुटुम्बे स गार्हपत्यो यस्मिन्पच्यते सोऽन्वाहार्यपचनः २

**2/03/07/03**— ऊर्जं पुष्टिं प्रजां पशूनिष्टापूर्तमिति गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति ३

**2/03/07/04**— पयोपसेचनमन्नमग्निष्टोमसंमितं सर्पिषोक्थ्यसंमितं मधुनातिरात्रसंमितं मांसेन द्वादशाहसंमितमुदकेन प्रजावृद्धिरायुषश्च ४

**2/03/07/05**— प्रिया अप्रियाश्चातिथयः स्वर्गं लोकं गमयन्तीति विज्ञायते ५

**2/03/07/06**— स यत्प्रातर्मध्यंदिने सायमिति ददाति सवनान्येव तानि भवन्ति ६

**2/03/07/07**— यदनुतिष्ठत्युदवस्यत्येव तत् ७

**2/03/07/08**— यत्सान्त्वयतति सा दक्षिणा प्रशंसा ८

**2/03/07/09**— यत्संसाधयति ते विष्णुक्रमाः ९

**2/03/07/10**— यदुपावर्तते सोऽवभृथः १०

**2/03/07/11**— इति हि ब्राह्मणम् ११

## विधिः④

**2/04/08/01—** येन कृतावसथः *(=दत्ताश्रयः)* स्यादतिथिर्न तं प्रत्युत्तिष्ठेत्प्रत्यवरोहेद्वा पुरस्ताच्चेदभिवादितः १

**2/04/08/02—** शेषभोज्यतिथीनां स्यात् २

**2/04/08/03—** न रसान्गृहे भुञ्जीतानवशेषमतिथिभ्यः ३

**2/04/08/04—** नात्मार्थमभिरूपमन्नं पाचयेत् ४

**2/02/04/11—** अतिथीनेवाग्रे भोजयेत् ११

**2/02/04/12—** बालान् वृद्धान् रोग-संबन्धान् स्त्रीश् चान्तर्वत्नीः १२

**2/02/04/13—** काले स्वामिनावन्नार्थिनं न प्रत्याचक्षीयाताम् १३

**2/02/04/14—** अभावे भूमिरुदकं तृणानि कल्याणी वाग् इति । एतानि वै सतोऽगारे न क्षीयन्ते कदाचनेति १४

**2/02/04/15—** एवंवृत्तावनन्तलोकौ भवतः १५

**2/03/06/07—** तमभिमुखोऽभ्यागम्य यथावयः समेत्य तस्यासनमाहारयेत् ७

**2/03/06/08—** शक्तिविषये नाबहुपादमासनं भवतीत्येके ८

**2/03/06/09—** तस्य पादौ प्रक्षालयेत् । शूद्र मिथुनावित्येके ९

**2/03/06/10—** अन्यतरोऽभिषेचने स्यात् १०

**2/03/06/11—** तस्योदकमाहारयेन्मृन्मयेनेत्येके ११

**2/03/06/12—** नोदकमाचारयेद् असमावृत्तः १२

**2/03/06/13—** अध्ययनसांवृत्तिश्चात्राधिका १३

**2/03/06/14—** सान्त्वयित्वा तर्पयेद्रसैर्भक्ष्यैरद्भिरवरार्ध्येनेति १४

**2/03/06/15—** आवसथं दद्यादुपरिशय्यामुपस्तरणमुपधानं सावस्तरणमभ्यञ्जनं चेति १५

**2/03/06/16—** अन्नसंस्कर्तारमाहूय व्रीहीन्यवान्वा तदर्थान्निर्वपेत् १६

**2/03/06/17—** उद्धृतान्यन्नान्यवेक्षेतेदं भूया १७

**2/03/06/18—** इदा३मिति भूय उद्धरेत्येव ब्रूयात् १८

**2/03/07/12—** राजानं चेदतिथिरभ्यागच्छेच्छ्रेयसीमस्मै पूजामात्मनः कारयेत् १२

**2/03/07/13—** आहिताग्निं चेदतिथिरभ्यागच्छेत्स्वयमेनमभ्युदेत्य ब्रूयात् । व्रात्य क्वावात्सीरिति । व्रात्य उदकमिति । व्रात्य तर्पयंस्त्विति १३

**2/03/07/14**— पुराग्निहोत्रस्य होमादुपांशु जपेत् । व्रात्य यथा ते मनस्तथास्त्विति । व्रात्य यथा ते वशस्तथास्त्विति । व्रात्य यथा ते प्रियं तथास्त्विति । व्रात्य यथा ते निकामस्तथास्त्विति १४

**2/03/07/15**— यस्योद्धृतेष्वहुतेष्वग्निष्वतिथिरभ्यागच्छेत्स्वयमेनमभ्युदेत्य ब्रूयात्व्रात्य अतिसृज होष्यामि । इत्यतिसृष्टेन होतव्यम् । अनतिसृष्टश्चेज्जुहुयाद्दोषं ब्राह्मणमाह १५

## विधौ पात्रभेदात् सत्कारभेदः④

**2/02/04/16**— ब्राह्मणायानधीयानायासनमुदकमन्नमिति देयम् । न प्रत्युत्तिष्ठेत् १६

**2/02/04/17**— अभिवादनायैवोत्तिष्ठेदभिवाद्यश्चेत् १७

**2/02/04/18**— राजन्यवैश्यौ च १८

**2/02/04/19**— शूद्रमभ्यागतं कर्मणि नियुञ्ज्यात् । अथास्मै दद्यात् १९

**2/02/04/20**— दासा वा राजकुलादाहृत्यातिथिवच् छूद्रम् पूजयेयुः २०

*(बोधायनो वैश्वदेवप्रकरणे - "सर्वेभ्योभ्यागतेभ्य आश्वचण्डालेभ्यस्स्वागतं कार्यम्" इति। )*

**2/03/07/16**— एकरात्रं चेदतिथीन्वासयेत्पार्थिवांल् लोकानभिजयति द्वितीययान्तरिक्ष्यांस्तृतीयया दिव्यांश्चतुर्थ्या परावतो लोकानपरिमिताभिरपरिमितांल् लोकानभिजयतीति विज्ञायते १६

**2/03/07/17**— असमुदेतश्चेदतिथिर्ब्रुवाण आगच्छेदासनमुदकमन्नं श्रोत्रियाय ददामीत्येव दद्यात् । एवमस्य समृद्धं भवति १७

**2/04/08/05**— गोमधुपर्कार्हो वेदाध्यायः ५

**2/04/08/06**— आचार्य, ऋत्विक्, स्नातको, राजा वा धर्मयुक्तः *(मधुपर्कार्हाः)*६

**2/04/08/07**— आचार्यायर्त्विजे श्वशुराय राज्ञ इति परिसंवत्सरादुपतिष्ठद्भ्यो गौर्मधुपर्कश्च ७

## मधुपर्कः④

**2/04/08/08**— दधि मधुसंसृष्टं मधुपर्कः पयो वा मधुसंसृष्टम् ८

**2/04/08/09**— अभाव उदकम् ९

## लोपे प्रायश्चित्तम्④

**2/04/08/14**— अतिथिं निराकृत्य यत्र गते भोजने स्मरेत्ततो विरम्योपोष्य १४

**2/04/09/01**— श्वोभूते यथामनसं तर्पयित्वा संसाधयेत् १

## अनुव्रजनम्④

**2/04/09/02**— यानवन्तमा यानात् २

**2/04/09/03**— यावन्नानुजानीयादितरः ३

**2/04/09/04**— अप्रतीभायां *(बुद्धौ न जातायाम्)* सीम्नो निवर्तेत ४

## अतिथिभावः④

**1/02/08/23**— मातरं पितरम् आचर्यम् अग्नींश् च गृहाणि च रिक्त-पाणिर् नोपगच्छहेद्, राजानं चेन् न श्रुतम् इति २३

**2/03/06/19**— द्विषन्द्विषतो वा नान्नमश्नीयाद्दोषेण वा मीमांसमानस्य मीमांसितस्य वा १९

**2/03/06/20**— पाप्मानं हि स तस्य भक्षयतीति विज्ञायते २०

## अभिवादनम्③

**1/02/05/12**— सदा महान्तम् अपररात्रम् उत्थाय
गुरोस् तिष्ठन्
प्रातर् अभिवादम् अभिवादयीत - "असाव् अहं भो" इति १२

**1/02/05/13**— समान-ग्रामे च वसताम् अन्येषाम् अपि वृद्धतराणां प्राक् प्रातर्-आशात् १३

**1/02/05/14**— प्रोष्य च समागमे १४

**1/02/05/15**— स्वर्गम् आयुश् चेप्सन् १५

**1/02/05/16**— दक्षिणम् बाहुं श्रोत्र-समं प्रसार्य ब्राह्मणोऽभिवादयीत उरःसमं
राजन्यो मध्यसमं
वैश्यो नीचैः
शूद्रः प्राञ्जलि १६

**1/02/05/17**— प्लावनं च नाम्नो *(ऽन्तिमस्वरस्य)* ऽभिवादन*(सम्बद्ध)*-प्रत्यभिवादने च पूर्वेषां वर्णानाम् १७

**1/02/05/18**— उदिते त्वादित्य आचार्येण समेत्योपसङ्ग्रहणम् १८

**1/02/05/19**— सदैवाभिवादनम् १९

**1/02/05/20**— उपसंग्राह्य आचार्य इत्येके २०

**1/02/05/21**— दक्षिणेन पाणिना दक्षिणं पादम्
अधस्ताद् अभ्यधिमृश्य सकुष्ठिकम् उपसंगृह्णीयात् २१

**1/02/05/22**— उभाभ्याम् एवोभाव् अभिपीडयत
उपसंग्राह्याव् इत्य् एके २२

**1/04/14/18**— अप्रयतेन नाभिवाद्यम् १८

**1/04/14/19**— तथाप्रयताय १९

**1/04/14/20**— अप्रयतश्च न प्रत्यभिवदेत् २०

**1/04/14/22**— न सोपानह्वेष्टितशिरा अवहितपाणिर्वाभिवादयीत २२

**1/04/14/23**— सर्वनाम्ना स्त्रियो राजन्यवैश्यौ च न नाम्ना २३

**1/04/14/24**— मातरमाचार्यदारं चेत्येके २४

**1/04/14/26**— कुशलमवरवयसं वयस्यं वा पृच्छेत् २६

**1/04/14/27**— अनामयं क्षत्रियम् २७

**1/04/14/28**— अनष्टं वैश्यम् २८

**1/04/14/29**— आरोग्यं शूद्र म् २९

**1/04/14/30**— नासंभाष्य श्रोत्रियं व्यतिव्रजेत् ३०

**1/04/14/31**— अरण्ये च स्त्रियम् ३१

**1/04/14/11**— ऋत्विक्श्वशुरपितृव्यमातुलानवरवयसः प्रत्युत्थायाभिवदेत् ११

**1/04/14/12**— तूष्णीं वोपसंगृह्णीयात् १२

**1/04/14/13**— दशवर्षं पौरसख्यं पञ्चवर्षं तु चारणम् । त्रिवर्षपूर्वः श्रोत्रियः अभिवादनमर्हति १३

**1/04/14/14**— ज्ञायमाने वयोविशेषे वृद्धतरायाभिवाद्यम् १४

**1/04/14/15**— विषमगतायागुरवे नाभिवाद्यम् १५

**1/04/14/16**— अन्वारुह्य वाभिवादयीत १६

**1/04/14/17**— सर्वत्र तु प्रत्युत्थायाभिवादनम् १७

**1/04/14/21**— पतिवयसः स्त्रियः २१

**1/04/14/25**— दशवर्षश्च ब्राह्मणः शतवर्षश्च क्षत्रियः । पितापुत्रौ स्म तौ विद्धि तयोस्तु ब्राह्मणः पिता २५

**1/04/13/13**— समादिष्टमध्यापयन्तं यावदध्ययनमुपसंगृह्णीयात् १३

**1/04/13/14**— नित्यमर्हन्तमित्येके १४

**1/04/13/15**— न गतिर् *(=शुश्रूषा)* विद्यते १५

# अग्नौ चर्या③

# हविर्-विवेकः④

**2/06/15/14**— न क्षारलवणहोमो विद्यते १४

**2/06/15/15**— तथावरान्न संसृष्टस्य च १५

**2/06/15/16**— अहविष्यस्य होम उदीचीनमुष्णं भस्मापोह्य तस्मिञ्जुह्यात्तद्धुतमहुतं चाग्नौ भवति १६

# समिधि पोषणे④

**1/05/15/12**— नाप्रोक्षितमिन्धनमग्नावादध्यात् १२

**1/05/15/20**— न चैनमुपधमेत् २०

# अग्नेर् हरणम्④

**2/05/12/09**— अग्निमपश्च न युगपद्धारयीत ९

# स्थापनम्④

**1/05/15/21**— खट्वायां च नोपदध्यात् २१

**2/05/12/10**— नानाग्नीनां च संनिवापं वर्जयेत् १०

### स्थालीपाकतन्त्र उल्लेखनम्⑤

**2/01/01/12**— नित्यं लोक उपदिशन्ति १२

**2/01/01/13**— यत्र क्व चाग्निमुपसमाधास्यन्स्यात्तत्र प्राचीरुदीचीश्च तिस्रस्तिस्रो लेखा लिखित्वाद्भिरवोक्ष्याग्निमुपसमिन्ध्यात् १३

**2/01/01/14**— *(शिष्टम् उदकम्)* उत्सिच्यैतदुदकमुत्तरेण पूर्वेण वान्यदुपदध्यात् १४

# पात्र-विवेकः④

**1/05/15/18**— अग्निं नाप्रयत आसीदेत् १८

**1/05/15/19**— इषुमात्रादित्येके १९

**2/06/15/17**— न स्त्री जुहुयात् १७

**2/06/15/18**— नानुपेतः १८

## गौरव-दर्शनम्④

**2/05/12/11**— प्रतिमुखमग्निमाह्रियमाणम् नाप्रतिष्ठितं भूमौ प्रदक्षिणीकुर्यात् *(प्रतिष्ठिते तु प्रदक्षिणीकुर्यात्)*११

**2/05/12/06**— अग्निं ब्राह्मणं चान्तरेण नातिक्रामेत् ६

**2/05/12/07**— ब्राह्मणांश्च ७

**2/05/12/08**— अनुज्ञाप्य वातिक्रामेत् ८

## दानम्③

## विधिः④

**2/04/09/08**— सर्वाण्युदकपूर्वाणि दानानि ८

**2/04/09/09**— यथाश्रुति विहारे *(=यागशालायाम्)*९

**2/08/20/18**— योक्ता च धर्म-युक्तेषु द्रव्य-परिग्रहेषु च १८

**2/08/20/19**— प्रतिपादयिता च तीर्थे १९

## द्रव्याणि④

**2/06/13/10**— दानं क्रयधर्मश्चापत्यस्य न विद्यते १०

## पत्नी-पात्रम्④

**2/06/14/16**— जाया-पत्योर् न विभागो विद्यते १६

**2/06/14/17**— पाणिग्रहणाद्धि सहत्वं कर्मसु १७

**2/06/14/18**— तथा पुण्यफलेषु १८

**2/06/14/19**— द्रव्यपरिग्रहेषु च १९

**2/06/14/20**— न हि भर्तुर्विप्रवासे नैमित्तिके दाने स्तेयमुपदिशन्ति २०

## सन्दर्भः④

**2/06/15/12**— देशतः *(→तीर्थस्थानेषु)* कालतः *(→ग्रहणादौ)* शौचतः *(→कृच्छ्रादेर् अन्ते)* सम्यक् प्रतिग्रहीतृत इति दानानि प्रतिपादयति १२

...

## प्रतिग्रह-पात्रता④

**2/07/17/10**— तुल्य-गुणेषु वयो-वृद्धः श्रेयान्,
द्रव्य-कृशश् चेप्सन् १०

**2/08/20/18**— योक्ता च धर्म-युक्तेषु द्रव्य-परिग्रहेषु च १८

**2/08/20/19**— प्रतिपादयिता च तीर्थे १९

**2/08/20/20**— *(दानस्य नि)*यन्ता चातीर्थे - यतो न भयं स्यात् २०

## ब्राह्मण-भोजनम्④

**2/06/15/11**— शुचीन् मन्त्रवतः सर्व-कृत्येषु भोजयेत् ११

## अन्यत्रोक्तम्④

भिक्षा-विचारः, प्रतिग्रह-निषेधः, महायज्ञो, वैश्वदेवम्, भोजनविधिः ...।

## गौरव-दर्शनम्③

[अभिवादन-विषयः, शुश्रूषा, भोजननियमाश् चाऽन्यत्रोक्तः]

**1/04/13/02**— पूजा वर्णज्यायसां कार्या २

**1/04/13/03**— वृद्धतराणां च ३

**1/04/14/06**— मातरि पितर्याचार्यवच्छुश्रूषा ६

**1/04/14/07**— समावृत्तेन सर्वे गुरव उपसंग्राह्याः ७

**1/04/14/08**— प्रोष्य च समागमे ८

**1/04/14/09**— भ्रातृषु भगिनीषु च यथापूर्वमुपसंग्रहणम् ९

**1/04/14/10**— नित्या च पूजा यथोपदेशम् १०

## पथि अवकाश-दानम्④

**2/05/11/05**— राज्ञः पन्था ब्राह्मणेनासमेत्य ५

**2/05/11/06**— समेत्य तु ब्राह्मणस्यैव पन्थाः ६

**2/05/11/07**— यानस्य भाराभिनिहितस्यातुरस्य स्त्रिया इति सर्वैर्दातव्यः ७

**2/05/11/08**— वर्णज्यायसां चेतरेर्वर्णैः ८

**2/05/11/09**— अशिष्टपतितमत्तोन्मत्तानामात्मस्वस्त्ययनार्थेन सर्वैरेव दातव्यः ९

## अतिक्रमणम्④

**2/05/12/06**— अग्निं ब्राह्मणं चान्तरेण नातिक्रामेत् ६

**2/05/12/07**— ब्राह्मणांश्च ७

**2/05/12/08**— अनुज्ञाप्य वातिक्रामेत् ८

समुदिते गुरुवदाचरणम्, तच्चान्यत्रोक्तम्। परियष्टादाव् अन्यत्र।

## भाषणे④

**1/02/06/05**— न चास्य सकाशे संविष्टो भाषेत् ५

**1/02/06/06**— अभिभाषितस्त्वासीनः प्रतिब्रूयात् ६

**1/02/06/07**— अनूत्थाय तिष्ठन्तम् ७

**1/02/06/08**— गच्छन्तमनुगच्छेत् ८

**1/02/06/09**— धावन्तमनुधावेत् ९

## उपसर्पणे④

**1/02/06/10**— न सोपानःवेष्टितशिरा अवहितपाणिर्वासीदेत् १०

**1/02/06/11**— अध्वापन्नस् तु कर्म-युक्तो ऽवासीदेत् ११

**1/02/06/12**— न चेद् उपसीदेत् १२

**1/02/06/13**— देवम् इवाचार्यम् उपासीताविकथयन्न् अविमना वाचं शुश्रूषमाणोऽस्य १३

## देहस्थितिः④

**1/02/06/26**— तिष्ठति च नासीतानासनयोगविहिते २६

**1/02/06/27**— आसीने च न संविशेत् २७

**1/02/06/28**— चेष्टति च चिकीर्षन्तच्छक्तिविषये २८

**1/02/07/02**— नापपर्यावर्तेत गुरोः प्रदक्षिणीकृत्यापेयात् २

## उपवेशनम्④

**1/02/06/14**— अनुपस्थकृतः १४

**1/02/06/15**— अनुवाति वीतः १५

**1/02/06/16**— अप्रतिष्टब्धः पाणिना १६

**1/02/06/17**— अनपश्रितोऽन्यत्र १७

**1/02/06/18**— यज्ञोपवीती द्विवस्त्रः १८

**1/02/06/19**— अधोनिवीतस्त्वेकवस्त्रः १९

**1/02/06/20**— अभिमुखोऽनभिमुखम् २०

**1/02/06/21**— अनासन्नोऽनतिदूरे २१

**1/02/06/22**— यावदासीनो बाहुभ्याम्प्राप्नुयात् २२

**1/02/06/23**— अप्रतिवातम् २३

**1/02/06/24**— एकाध्यायी दक्षिणं बाहुं प्रत्युपसीदेत् २४

**1/02/06/25**— यथावकाशं बहवः २५

# इतरेषु व्यवहारः④

**1/02/06/29**— न चास्य सकाशेऽन्वक्स्थानिनमुपसंगृह्णीयात् २९

**1/02/06/30**— गोत्रेण वा कीर्तयेत् ३०

**1/02/06/31**— न चैनं प्रत्युत्तिष्ठेदनूत्तिष्ठेद्वा ३१

**1/02/06/32**— अपि चेत्तस्य गुरुः स्यात् ३२

**1/02/06/33**— देशात्त्वासनाच्च संसर्पेत् ३३

**1/02/06/34**— नाम्ना तदन्तेवासिनं गुरुमप्यात्मन इत्येके ३४

**1/02/06/35**— यस्मिंस्त्वनाचार्यसंबन्धाद्गौरवं वृत्तिस्तस्मिन्न् अन्वक्स्थानीये ऽप्याचार्यस्य ३५

**1/02/07/12**— यां विद्यां कुरुते गुरौ तेऽप्यस्याचार्या ये तस्यां गुरोर्वंश्याः १२

**1/02/07/13**— यानन्यान्पश्यतोऽस्योपसंगृह्णीयात् तदा त्वेत उपसंग्राह्याः १३

**1/02/07/27**— अन्यत्रोपसंग्रहणादुच्छिष्टाशनाच्चाचार्यवदाचार्यदारे वृत्तिः २७

**1/02/07/28**— तथा समादिष्टेऽध्यापयति २८

**1/02/07/29**— वृद्धतरे च सब्रह्मचारिणि २९

**1/02/07/30**— उच्छिष्टाशनवर्जमाचार्यवदाचार्यपुत्रे वृत्तिः ३०

**1/02/07/31**— समावृत्तस्याप्येतदेव सामयाचारिकमेतेषु ३१

**1/04/13/13**— समादिष्टमध्यापयन्तं यावदध्ययनमुपसंगृह्णीयात् १३

**1/04/13/14**— नित्यमर्हन्तमित्येके १४

**1/02/08/26**— न चैनमध्ययनविघ्नेनात्मार्थेषूपरुन्ध्यादनापत्सु २५

# समावृत्तस्य गुरौ④

**1/02/07/27**— अन्यत्रोपसंग्रहणादुच्छिष्टाशनाच्चाचार्यवदाचार्यदारे वृत्तिः २७

**1/02/07/29**— वृद्धतरे च सब्रह्मचारिणि २९

**1/02/07/30**— उच्छिष्टाशनवर्जमाचार्यवदाचार्यपुत्रे वृत्तिः ३०

**1/02/07/31**— समावृत्तस्याप्येतदेव सामयाचारिकमेतेषु ३१

**1/02/08/01**— यथा ब्रह्मचारिणो वृत्तम् १

**1/02/08/08**— उच्चैस्तरां नासीत ८

**1/02/08/09**— तथा बहुपादे ९

**1/02/08/10**— सर्वतः प्रतिष्ठिते १०

**1/02/08/11**— शय्यासने चाचरिते नाविशेत् ११

**1/02/08/12**— यानमुक्तोऽध्वन्यन्वारोहेत् १२

**1/02/08/13**— सभानिकषकटस्वस्तरांश्च १३

**1/02/08/14**— नानभिभाषितो गुरुमभिभाषेत प्रियादन्यत् १४

**1/02/08/15**— व्युपतोदव्युपजावव्यभिहासोदामन्त्रणनामधेयग्रहणप्रेषणानीति गुरोर्वर्जयेत् १५

**1/02/08/16**— आपद्यर्थं ज्ञापयेत् १६

**1/02/08/17**— सह वसन्सायं प्रातरनाहूतो गुरुं दर्शनार्थो गच्छेत् १७

**1/02/08/18**— विप्रोष्य च तदहरेव पश्येत् १८

**1/02/08/20**— प्रतिषेधेदितरः २०

**1/02/08/21**— लुप्यते पूजा चास्य सकाशे २१

**1/02/08/22**— मुहूंश्चाचार्यकुलं दर्शनार्थो गच्छेद्यथाशक्त्यधिहस्त्यमादायापि दन्तप्रक्षालनानीति २२

**2/02/05/04**— समावृत्तं चेदाचार्योऽभ्यागच्छेत्तमभिमुखो ऽभ्यागम्य तस्योपसंगृह्य न बीभत्समान उदकमुपस्पृशेत्पुरस्कृत्योपस्थाप्य यथोपदेशं पूजयेत् ४

**2/02/05/05**— आसने शयने भक्ष्ये भोज्ये वाससि वा संनिहिते निहीनतरवृत्तिः स्यात् ५

**2/02/05/06**— तिष्ठन्सव्येन पाणिनानुगृह्याचार्यमाचमयेत् ६

**2/02/05/07**— अन्यं वा समुदेतम् ७

**2/02/05/08**— स्थानासनचङ्क्रमणस्मितेष्वनुचिकीर्षन् ८

**2/02/05/09**— संनिहिते मूत्रापुरीषवातकर्मोच्चैर्भाषाहासष्ठेवनदन्तस्कवननिःशृङ्खणभ्रुक्षेपणतालननिष्ठ्यानीति ९

**2/02/05/10**— दारे प्रजायां चोपस्पर्शनभाषा विस्रम्भपूर्वाः परिवर्जयेत् १०

**2/02/05/11**— वाक्येन वाक्यस्य प्रतीघातमाचार्यस्य वर्जयेत् ११

**2/02/05/12**— श्रेयसां च १२

**2/02/05/13**— सर्वभूतपरीवादाक्रोशांश्च १३

**2/02/05/14**— विद्यया च विद्यानाम् १४

**2/02/05/15**— यया विद्यया न विरोचेत पुनराचार्यमुपेत्य नियमेन साधयेत् १५

# यज्ञोपवीतम्④

**1/05/15/01**— उपासने गुरूणां वृद्धानामतिथीनां होमे जप्यकर्मणि भोजन आचमने स्वाध्याये च यज्ञोपवीती स्यात् १

# सन्ध्यावन्दनम्③

**1/11/30/08**— संध्योश् च बहिर्ग्रामाद् आसनं, वाग्-यतश् च ८

**1/11/30/09**— विप्रतिषेधे श्रुतिलक्षणं *(सन्ध्याग्निहोत्रादिचोदकम्)* बलीयः ९

# श्राद्धम्③

# फलम्④

**2/07/16/01**— सह देवमनुष्या अस्मिंल् लोके पुरा बभूवुः ।
अथ देवाः कर्मभिर् दिवं जग्मुर्,
अहीयन्त मनुष्याः ।
तेषां ये तथा कर्माण्य् आरभन्ते
सह देवैर् ब्रह्मणा चामुष्मिंल् लोके भवन्ति ।
अथैतन् मनुः श्राद्ध-शब्दं कर्म प्रोवाच १

**2/07/16/02**— प्रजानिःश्रेयसाय*(च)* २

*(कालभेदेन फलभेदो ऽध उक्तः।)*

# पात्राणि④

**2/07/16/03**— तत्र पितरो देवता
ब्राह्मणास् त्वाहवनीयार्थे ३

**2/07/17/04**— प्रयतः प्रसन्न-मनाः सृष्टो*(=उत्साहवान्)* भोजयेद्
ब्राह्मणान् ब्रह्म-विदो योनि-गोत्र-मन्त्रान्तेवास्य्-असंबन्धान् ४

**2/07/17/05**— गुणहान्यां तु
परेषां समुदेतः सोदर्योऽपि भोजयितव्यः ५

**2/07/17/06**— एतेनान्तेवासिनो व्याख्याताः *(अन्यालाभे भोजनीया इति)* ६

**2/07/17/07**— अथाप्य् उदाहरन्ति ... ७

**2/07/17/08**— संभोजनी *(=परस्पर-धर्म-भोजनम्)* नाम पिशाच-भिक्षा
नैषा पितॄन् गच्छति नोत देवान् ।
इहैव सा चरति क्षीण-पुण्या
शालान्तरे गौर् इव नष्ट-वत्सा ८

**2/07/17/09**— "इहैव संभुञ्जती दक्षिणा कुलात् कुलं विनश्यती"ति ९

**2/07/17/10**— तुल्य-गुणेषु वयो-वृद्धः श्रेयान्,
द्रव्य-कृशश् चेप्सन् १०

**2/07/17/20**— श्वभिर् अपपात्रैश् च
श्राद्धस्य दर्शनं परिचक्षते २०

**2/07/17/21**— श्वित्रः *(=श्वेतकुष्टः)* शिपि-विष्टः*(=खल्वाटः)* परतल्प-गाम्य् आयुधीय-पुत्रः, शूद्रोत्पन्नो ब्राह्मण्याम्

इत्य् एते श्राद्धे भुञ्जानाः
**पङ्क्ति-दूषणा** भवन्ति २१

**2/07/17/22**— त्रिमधुस् त्रिसुपर्णस् त्रिणाचिकेतश् चतुर्मेधः पञ्चाग्निर् ज्येष्ठसामिको वेदाध्याय्य् अनूचानपुत्रः श्रोत्रिय इत्येते
श्राद्धे भुञ्जानाः पङ्क्ति-पावना भवन्ति २२

**2/08/20/02**— समुदेतांश्च भोजयेन्, न चातद्गुणायोच्छिष्टं दद्युः २

## कालः④

**2/07/16/04**— मासि मासि कार्यम् *(यावज्जीवम्)* ४

**2/07/16/05**— अपर-पक्षस्यापराह्णः श्रेयान् ५

**2/07/16/06**— तथा ऽपरपक्षस्य जघन्यान्य् अहानि ६

**2/07/16/07**— सर्वेष्व् एवापर-पक्षस्याहस्सु क्रियमाणे
**पितॄन् प्रीणाति** ।
कर्तुस्तु *(प्रतिपद्येव द्वितीयायाम् एवेत्यादि)* कालाभिनियमात् फल-विशेषः ७

**2/07/16/08**— प्रथमेऽहनि क्रियमाणे स्त्री-प्रायम् अपत्ये जायते ८

**2/07/16/09**— द्वितीये ऽस्तेनाः ९

**2/07/16/10**— तृतीये ब्रह्मवर्चसिनः १०

**2/07/16/11**— चतुर्थे क्षुद्र-पशुमान् ११

**2/07/16/12**— पञ्चमे पुमांसः ।
बह्व्-अपत्यो,
न चानपत्यः प्रमीयते १२

**2/07/16/13**— षष्ठे ऽध्व-शीलो ऽक्ष-शीलश् च १३

**2/07/16/14**— सप्तमे *(भू-)*कर्षे राद्धिः*(=सिद्धिः)* १४

**2/07/16/15**— अष्टमे पुष्टिः १५

**2/07/16/16**— नवम एक-खुराः *(अश्वादयः)* १६

**2/07/16/17**— दशमे व्यवहारे राद्धिः*(=सिद्धिः)* १७

**2/07/16/18**— एकादशे कृष्णायसं त्रपु-सीसम् १८

**2/07/16/19**— द्वादशे पशु-मान् १९

**2/07/16/20**— त्रयोदशे बहु-पुत्रो बहु-मित्रो दर्शनीयापत्यः । युव-मारिणस् तु भवन्ति २०

**2/07/16/21**— चतुर्दश आयुधे राद्धिः*(=सिद्धिः)* २१

**2/07/16/22**— पञ्चदशे पुष्टिः २२

**2/07/17/23**— न च नक्तं श्राद्धं कुर्वीत २३

**2/07/17/25**— अन्यत्र राहु-दर्शनात् *(यदा नक्तम् अपि कुर्वीत)* २५

**विश्वास-टिप्पनी**— "उदीच्यास् त्व् एतत् प्रायेण न पठन्ति । तथा च पूर्वैर्न व्याख्यातम् ।" इति हरदत्तः।

## द्रव्याणि④

**2/07/16/23**— तत्र द्रव्याणि तिल-माषा व्रीहि-यवा आपो मूल-फलानि २३

**2/07/16/24**— स्नेहवति त्व् एवान्ने तीव्रतरा पितॄणां प्रीतिर्द्राघीयांसं च कालम् २४

**2/07/16/25**— तथा धर्माहृतेन द्रव्येण तीर्थे *(=सत्पात्रे)* प्रतिपन्नेन २५

**2/07/16/26**— संवत्सरं गव्येन *(मांसेन)* प्रीतिः २६

**2/07/16/27**— भूयांसम् अतो माहिषेण २७

**2/07/16/28**— एतेन *(माहिष-शब्देन)* ग्राम्यारण्यानां पशूनां मांसं *(श्राद्धे)* मेध्यं व्याख्यातम् २८

**2/07/17/01**— खड्गोपस्तरणे खड्ग-मांसेनानन्त्यं कालम् *(पितृप्रीतिः)* १

**2/07/17/02**— तथा शत-बलेर् *(=बहु-शल्यस्य रोहितस्य)* मत्स्यस्य मांसेन २

**2/07/17/03**— वार्ध्राणसस्य *(क्रौञ्चनिभस्य)* च ३

**2/08/19/17**— नैय्यमिकं *(→मासि मासि क्रियमाणं)* तु श्राद्धं स्नेहवद्
एव दद्यात् १७

**2/08/19/18**— सर्पिर् मांसम् इति प्रथमः कल्पः १८

**2/08/19/19**— अभावे तैलं शाकम् इति १९

**2/08/19/20**— मघासु चाधिकं श्राद्ध-कल्पेन
सर्पिर् ब्राह्मणान् भोजयेत् २०

**2/08/20/01**— मासि-श्राद्धे
तिलानां द्रोणं द्रोणं येनोपायेन *(= अभ्यङ्ग-पाकादौ)* शक्नुयात्
तेनोपयोजयेत् १

# विधिः④

**2/07/17/11**— पूर्वेद्युर् निवेदनम् ११

**2/07/17/12**— अपरेद्युर् द्वितीयम् १२

**2/07/17/13**— तृतीयम् आमन्त्रणम् *(= अगारं प्रत्यानयनम्)* १३

**2/07/17/14**— त्रिःप्रायम् एके श्राद्धम् उपदिशन्ति ... १४

**2/07/17/15**— यथा प्रथमम्, एवं द्वितीयं, तृतीयं च १५

**2/07/17/16**— *(उक्तेषु त्रिषु)* सर्वेषु वृत्तेषु,
सर्वतः समवदाय
शेषस्य ग्रासावरार्ध्यं प्राश्नीयाद् यथोक्तम् १६

**2/07/17/17**— उदीच्य-वृत्तिस् त्व् - आसन-गतानां हस्तेषूदपात्रानयनम् *("अर्घ्यम्" इति)* १७

**2/07/17/18**— "उद्ध्रियताम् अग्नौ च क्रियताम्"
इत्य् आमन्त्रयते १८

**2/07/17/19**—

> कामम् उद्ध्रियतां,
> कामम् अग्नौ क्रियताम्

इत्य् अतिसृष्ट
उद्धरेद् जुहुयाच् च १९

**2/07/17/24**— आरब्धे चाभोजनम् - आ समापनात् २४

# नित्य-श्राद्धम्, तेन श्राद्धान्त्यम्④

**2/08/18/05**— नित्य-श्राद्धम् ५

**2/08/18/06**— बहिर्ग्रामाच् छुचयः शुचौ देशे संस्कुर्वन्ति ६

**2/08/18/07**— तत्र नवानि द्रव्याणि *(=वक्ष्यमाणानि भाण्डादीनि)* ७

**2/08/18/08**— यैर् अन्नं संस्क्रियते येषु च भुज्यते ८

**2/08/18/09**— तानि च भुक्तवद्भ्यो दद्यात् ९

**2/08/18/10**— समुदेतांश् च भोजयेत् १०

**2/08/18/11**— न चातद्गुणायोच्छिष्टं प्रयच्छेत् ११

**2/08/18/12**— एवं संवत्सरम् १२

**2/08/18/13**— तेषाम् उत्तमं लोहेनाजेन कार्यम् १३

**2/08/18/14**— मानं *(=वेदीं)* च कारयेत् प्रतिच्छन्नम् १४

**2/08/18/15**— तस्योत्तरार्धे ब्राह्मणान्भोजयेत् १५

**2/08/18/16**—

> उभयान् पश्यति - ब्राह्मणांश् च भुञ्जानान्, माने च पितॄन्

इत्य् उपदिशन्ति १६

**2/08/18/17**— कृताकृतम् अत ऊर्ध्वम् १७

**2/08/18/18**— श्राद्धेन हि तृप्तिं वेदयन्ते पितरः १८

# गौरसर्षप-श्राद्धम् पौष्टिकम्④

**2/08/18/19**— तिष्येण पुष्टि-कामः १९

**2/08/19/01**— गौर-सर्षपाणां चूर्णानि कारयित्वा
तैः पाणि-पादं प्रक्षाल्य
मुखं कर्णौ प्राश्य च
यद्-वातो नातिवाति तद्-आसनो
ऽजिनं बस्तस्य *(=अजस्य)* प्रथमः कल्पो
वाग्यतो दक्षिणा-मुखो भुञ्जीत १

**2/08/19/02**—

> अनायुष्यं त्व् एवं-मुखस्य भोजनं मातुर्

इत्य् उपदिशन्ति *(येन जीवन्-मातृको नैतत् कुर्यात्)* २

**2/08/19/03**— औदुम्बरश् चमसः सुवर्ण-नाभः प्रशास्तः ३

**2/08/19/04**— न चान्येनापि भोक्तव्यः ४

**2/08/19/05**— यावद्-ग्रासं संनयन् ५

**2/08/19/06**— अस्कन्दयन् ६

**2/08/19/07**— नापजहीत *(सव्य-पाणिना पात्रम्)* ७

**2/08/19/08**— अपजहीत वा *(प्राणाहुत्य्-ऊर्ध्वम्)*८

**2/08/19/09**— कृत्स्नं ग्रासं ग्रसीत सहाङ्गुष्ठम् ९

**2/08/19/10**— न च मुख-शब्दं कुर्यात् १०

**2/08/19/11**— पाणिं च नावधूनुयात् ११

**2/08/19/12**— आचम्य चोर्ध्वौ पाणी धारयेद् आ प्रोदकी-भावात् *(=शुष्कभावात्)* १२

**2/08/19/13**— ततो ऽग्निम् उपस्पृशेत् १३

**2/08/19/14**— दिवा च न भुञ्जीतान्यन् मूलफलेभ्यः १४

**2/08/19/15**— स्थालीपाक*(दान-)*+अनुदेश्यानि *(=देवपितृभ्यः सङ्कल्पितानि)* च वर्जयेत् १५

**2/08/19/16**— सोत्तराच्छादनश् चैव यज्ञोपवीती *(=उत्तरीयं यज्ञोपवीतवत् कृत्वा)* भुञ्जीत १६

## स्थालीपाक-श्राद्धम् पौष्टिकम्④

**2/08/20/03**— उदगयन आपूर्यमाण-पक्षस्यैकरात्रम् अवरार्ध्यम् उपोष्य
तिष्येण पुष्टिकामः स्थालीपाकं श्रपयित्वा
महाराजम्*(=कुबेरम्)* इष्ट्वा

तेन सर्पिष्मता ब्राह्मणं भोजयित्वा
पुष्ट्य्-अर्थेन सिद्धिं वाचयीत ३

**2/08/20/04**— एवम् अहर् अहर् आ परस्मात् तिष्यात् ४

**2/08/20/05**— द्वौ द्वितीये ५

**2/08/20/06**— त्रींस्तृतीये ६

**2/08/20/07**— एवं संवत्सरम् अभ्युच्चयेन ७

**2/08/20/08**— महान्तं पोषं पुष्यति ८

**2/08/20/09**— आदित एवोपवासः ९

## वैश्वदेवम्③

## चोदनम्, फलम्④

**1/04/12/13**— अथ ब्राह्मणोक्ता विधयः १३

**1/04/12/14**— तेषां महायज्ञा महासत्त्राणीति संस्तुतिः १४

**1/04/12/15**— अहरहर्भूतबलिर्मनुष्येभ्यो यथाशक्ति दानम् १५

**1/04/13/01**— देवेभ्यः स्वाहाकार आ काष्ठात्, पितृभ्यः स्वधाकार ओदपात्रात्, स्वाध्याय इति १

**2/02/03/01**— आर्याः प्रयता वैश्वदेवेऽन्नसंस्कर्तारः स्युः १

**2/02/03/12**— गृहमेधिनोर्यदशनीयस्य होमा बलयश्च स्वर्गपुष्टिसंयुक्ताः १२

**2/02/04/09**— य एतानव्यग्रो यथोपदेशं कुरुते नित्यः स्वर्गः पुष्टिश्च ९

**2/06/15/13**— यस्याग्नौ न क्रियते यस्य चाग्रं न दीयते न तद्भोक्तव्यम् १३

## व्रतग्रहणम्④

**2/02/03/13**— तेषां मन्त्राणामुपयोगे द्वादशाहमधःशय्या ब्रह्मचर्यं क्षारलवणवर्जनं च १३

**2/02/03/14**— उत्तमस्यैकरात्रमुपवासः १४

## विधिः④

*(साधारणो ऽन्नसंस्कारविचारोऽन्यत्रोक्तः।)*

**2/02/03/09**— परोक्षमन्नं संस्कृतमग्नावधिश्रित्याद्भिः प्रोक्षेत् । तद्देवपवित्रमित्याचक्षते ९

**2/02/03/10**— सिद्धेऽन्ने तिष्ठन्भूतमिति स्वामिने प्रब्रूयात् १०

**2/02/03/11**— तत्सुभूतं विराड् अन्नं तन्मा क्षायीति प्रतिवचनः ११

**2/02/03/15**— बलीनां तस्य तस्य देशे संस्कारो हस्तेन परिमृज्यावोक्ष्य न्युप्य पश्चात्परिषेचनम् १५

**2/02/03/16**— औपासने पचने वा षड्भिराद्यैः प्रतिमन्त्रं हस्तेन जुहुयात् १६

- ओम्*(इत्यनुज्ञाक्षरं)* अ॒ग्नये॒ स्वाहा॑*(हविःप्रदानार्थः)*।
- सोमा॑य॒ स्वाहा॑।*(कैश्चिन्नोच्यते मन्त्रः।)*
- विश्वे॑भ्यो दे॒वेभ्य॒स् स्वाहा॑।
- *(खे)* ध्रु॒वाय॑ भू॒माय॑*(=भूम्ने)* स्वाहा॑।

ध्रु॒व॒-क्षित॑ये॒*(←स्वरः??) (खे)* स्वाहा॑।

*(विवाहे ध्रुव-दर्शन-मन्त्रेऽप्य् अयम् प्रयोगः)*

अ॒च्यु॒त॒-क्षित॑ये॒*(←स्वरः??)* स्वाहा॑।

- अ॒ग्नये॑ स्विष्ट॒कृते॑ स्वाहा॑।*(=रुद्रोऽग्निस्स्विष्टकृत्)*

**2/02/03/17**— उभयतः परिषेचनं यथा पुरस्तात् १७

अदि॒तेऽन्व॑मँस्थाः। *(इति दक्षिणतः, प्राचीनम्)*

अनु॑म॒तेऽन्व॑मँस्थाः। *(इति पश्चिमाद् उदीचीनम्)*

सर॑स्व॒ते ऽन्व॑मँस्थाः। *(इति उत्तरतः प्राचीनम्)*

देव॑ सवित॒: प्रासा॑वीः। *(इति प्रागारम्भं प्रदक्षिणं)*

**2/02/03/18**— एवं बलीनां देशे देशे समवेतानां सकृत्सकृदन्ते परिषेचनम् १८

**2/02/03/19**— सति सूपसंसृष्टेन कार्याः १९

**2/02/03/20**— अपरेणाग्निं सप्तमाष्टमाभ्यामुदगपवर्गम् २०

**2/02/03/21**— उदधानसंनिधौ नवमेन २१

- धर्मा॑य स्वाहा॑ । अध॑र्माय स्वाहा॑। *(अपरेणाग्निं सप्तमाष्टमाभ्यामुदगपवर्गम् २०)*
- अ॒द्भ्यस् स्वाहा॑ । *(उदधानसंनिधौ नवमेन २१)*

**2/02/03/22**— मध्येऽगारस्य दशमैकादशाभ्यां प्रागपवर्गम् २२

- ओ॒ष॒धि॒व॒न॒स्प॒तिभ्य॒स् स्वाहा॑। र॒क्षो॒दे॒व॒ज॒नेभ्य॒स् स्वाहा॑ । *(मध्येऽगारस्य दशमैकादशाभ्यां प्रागपवर्गम् २२)*

**2/02/03/23**— उत्तरपूर्वदेशेऽगारस्योत्तरैश्चतुर्भिः २३

- *(वास्तुविद्याप्रसिद्धेभ्यः)* गृह्या॑भ्य॒स् स्वाहा॑। अ॒व॒साने॑भ्यस्*(=सीमाभ्यः)* स्वाहा॑ । अ॒व॒साने॑पतिभ्य॒स् स्वाहा॑ । स॒र्व॒भू॒तेभ्य॒स् स्वाहा॑ । *(उत्तरपूर्वदेशेऽगारस्योत्तरैश्चतुर्भिः २३)*

**2/02/04/01**— शय्यादेशे कामलिङ्गेन १

**2/02/04/02**— देहल्यामन्तरिक्षलिङ्गेन २

- कामा॑य॒ स्वाहा॑ । *(शय्यादेशे कामलिङ्गेन)*
- अ॒न्तरि॑क्षाय॒ स्वाहा॑ । *(देहल्यामन्तरिक्षलिङ्गेन २)*

**2/02/04/03**— उत्तरेणापिधान्याम् ३

- यद् एज॑ति*(=कम्पते)* जग॑ति यच् च॒ चेष्ट॑ति, नाम्नो॑ भा॒गो ऽयं, नाम्ने॒ स्वाहा॑। *(उत्तरेणापिधान्याम् (अर्गले)३)*

**2/02/04/04**— उत्तरैर्ब्रह्मसदने ४

*(उत्तरैर्ब्रह्मसदने)*

- पृ॒थि॒व्यै स्वाहा॑। अ॒न्तरि॑क्षाय॒ स्वाहा॑। दि॒वे स्वाहा॑ ।
- सूर्या॑य॒ स्वाहा॑ । च॒न्द्रम॑से॒ स्वाहा॑ । नक्ष॑त्रेभ्य॒स् स्वाहा॑ ।
- इन्द्रा॑य॒ स्वाहा॑ । बृ॒ह॒स्पत॑ये॒ स्वाहा॑ । प्र॒जाप॑तये॒ स्वाहा॑ । ब्रह्म॑णे॒ स्वाहा॑।

**2/02/04/05**— दक्षिणतः पितृलिङ्गेन प्राचीनावीत्यवाचीनपाणिः कुर्यात् ५

- स्व॒धा पि॒तृभ्य॒स् स्वाहा॑। *( दक्षिणतः पितृलिङ्गेन प्राचीनावीत् अवाचीन-पाणिः कुर्यात् ५)*

**2/02/04/06**— रौद्र उत्तरो यथा देवताभ्यः ६

- नमो॑ रु॒द्राय॑ पश॒ुपत॑ये॒ स्वाहा॑। *(रौद्र उत्तरो यथा देवताभ्यः ६ तयोर् नाना परिषेचनं धर्म-भेदात् ७)*

**2/02/04/07**— तयोर्नाना परिषेचनं धर्मभेदात् ७

**2/02/04/08**— नक्तमेवोत्तमेन वैहायसम् ८

- ये भूताः प्र॒चर॑न्ति दिवा॒ /नक्तं॒
  बलि॑म् इ॒च्छन्तो॑ वि॒तुद॑स्य॒ प्रेष्याः॑ ।
  तेभ्यो॑ ब॒लिं पु॑ष्टि॒कामो॑ हरामि॒
  मयि॒ पुष्टिं॑ पुष्टि॑पतिर् दधातु॒ स्वाहा॑॥ *(नक्तमेवोत्तमेन वैहायसम् ८)*

**2/02/04/10**— अग्रं च देयम् १०

### आतिथ्यम्⑤

**2/02/04/11**— अतिथीनेवाग्रे भोजयेत् ११

**2/02/04/12**— बालान् वृद्धान् रोग-संबन्धान् स्त्रीश् चान्तर्वत्नीः १२

**2/04/09/05**— सर्वान्वैश्वदेवे भागिनः कुर्वीता श्व-चाण्डालेभ्यः ५

**2/04/09/06**— नानर्हद्भ्यो दद्याद् इत्य् एके ६

*(अतिथिभोजनम् अन्यत्रोक्तम्)*

## यज्ञः③

विशेष-यज्ञ-विचारा अन्यत्र, यथा - ब्रह्मयज्ञः, मनुष्ययज्ञः, पञ्च-महा-यज्ञाः।

**2/05/10/09**— नाननूचानमृत्विजं वृणीते न पणमानम् ८

# भिक्षा②

# भिक्षाग्रहणम्③

**1/01/03/25**— सर्वं लाभमाहरन्गुरवे सायं प्रातरमन्त्रेण भिक्षाचर्यं चरेद् भिक्षमाणोऽन्यत्रापपात्रेभ्योऽभिशस्ताच्च २५

**1/01/03/26**— स्त्रीणां प्रत्याचक्षाणानां समाहितो ब्रह्मचारीष्टं दत्तं हुतं प्रजां पशून्ब्रह्मवर्चसमन्नाद्यं वृङ्क्ते २६-१

तस्मादु ह वै ब्रह्मचारिसंघं चरन्तं न प्रत्याचक्षीतापि हैष्वेवम्विध एवंव्रतः स्यादिति हि ब्राह्मणम् २६-२

**1/01/03/27**— नानुमानेन भेक्षम् उच्छिष्टं - दृष्टश्रुताभ्यां तु २७

**1/01/03/28**— भवत्पूर्वया ब्राह्मणो भिक्षेत २८

**1/01/03/29**— भवद्मध्यया राजन्यः २९

**1/01/03/30**— भवदन्त्यया वैश्यः ३०

# भिक्षा-निवेदनम्③

**1/01/03/31**— तत्समाहृत्योपनिधायाचार्याय प्रब्रूयात् ३१

**1/01/03/32**— तेन प्रदिष्टं भुञ्जीत ३२

**1/01/03/33**— विप्रवासे गुरोराचार्यकुलाय ३३

**1/01/03/34**— तैर्विप्रवासेऽन्येभ्योऽपि श्रोत्रियेभ्यः ३४

**1/01/03/35**— नात्मप्रयोजनश्चरेत् ३५

**1/02/07/14**— गुरुसमवाये भिक्षयामुत्पन्नायां यमनुबद्धस्तदधीना भिक्षा १४

**1/02/07/15**— समावृत्तो मात्रे दद्यात् १५

**1/02/07/16**— माता भर्तारं गमयेत् १६

**1/02/07/17**— भर्ता गुरुम् १७

**1/02/07/18**— धर्मकृत्येषु वोपयोजयेत् १८

## भिक्षा-कारण-परीक्षा③

**2/05/10/01**— भिक्षणे निमित्तमाचार्यो विवाहो यज्ञो मातापित्रोर्बुभूर्षार्हतश्च नियमविलोपः १

**2/05/10/02**— तत्र गुणान्समीक्ष्य यथाशक्ति देयम् २

**2/05/10/03**— इन्द्रियप्रीत्यर्थस्य तु भिक्षणमनिमित्तम् । न तदाद्रियेत ३

... भिक्षा-प्रतिग्रहनिषेधा दान-साधारणविषयश्च अन्यत्रोक्ताः।

## भोजनविधिः②

## भोजन-मात्रा③

**2/04/09/12**— तथा चात्मनोऽनुपरोधं कुर्याद्यथा कर्मस्वसमर्थः स्यात् १२

**2/04/09/13**—

> 'अष्टौ ग्रासा मुनेर् भक्ष्याः षोडशाऽरण्य-वासिनः ।
> द्वात्रिंशतं गृहस्थस्याऽपरिमितं ब्रह्मचारिणः ॥
> आहिताग्निर् अनरड्वांश् च ब्रह्मचारी च ते त्रयः ।
> अश्नन्त एव सिध्यन्ति नैषां सिद्धिर् अनश्नताम्'

इति॥

**2/01/01/05**— औपवस्तम् एव कालान्तरे भोजनम् ५

## भोजनस्थानम्③

**1/05/16/18**— यस्य कुले म्रियेत न तत्रानिर्दशे भोक्तव्यम् १८

**1/05/16/19**— तथानुत्थितायां सूतिकायाम् १९

**1/05/16/20**— अन्तःशवे च २०

**1/05/17/06**— न नावि भुञ्जीत ६

**1/05/17/07**— तथा प्रासादे *(काष्ठमञ्चे)* ७

**1/05/17/08**— कृतभूमौ तु भुञ्जीत ८

# भोजनपात्रम्③

**1/05/17/09**— अनाप्रीते मृण्मये भोक्तव्यम् ९

**1/05/17/10**— आप्रीतं चेद् अभिदग्धे १०

**1/05/17/11**— परिमृष्टं लौहं प्रयतम् ११

**1/05/17/12**— निर्लिखितं दारुमयम् १२

**1/05/17/13**— यथागमं यज्ञे १३

# भोजन-वेला③

**2/01/01/01**— पाणिग्रहणादधि गृहमेधिनोर्व्रतम् १

**2/01/01/02**— कालयोर्भोजनम् २

**2/01/01/03**— अतृप्तिश्चान्नस्य ३

**2/01/01/04**— पर्वसु चोभयोर् उपवासः ४

**2/01/01/05**— औपवस्तम् एव कालान्तरे भोजनम् ५

**2/01/01/06**— तृप्तिश् चान्नस्य ६

**2/01/01/07**— यच्चैनयोः प्रियं स्यात् तद् एतस्मिन्न् अहनि भुञ्जीयाताम् ७

# विधिः③

**2/06/15/13**— यस्याग्नौ न क्रियते यस्य चाग्रं न दीयते न तद्भोक्तव्यम् १३

**1/05/16/09**— भोक्ष्यमाणस्तु प्रयतोऽपि द्विराचामेद्द्विः परिमृजेत्सकृदुपस्पृशेत् ९

**1/05/16/17**— दद्भिरपूपस्य नापच्छिन्द्यात् १७

**1/11/31/01**—

> प्राङ्-मुखो ऽन्नानि भुञ्जीत
> उच्चरेद् दक्षिणा-मुखः ।
> उदङ्-मुखो मूत्रं कुर्यात्
> प्रत्यक्-पादावनेजनम्

इति १

## अन्ते शोधनम्④

**2/02/04/23**— यत्र भुज्यते तत्समूह्य निर्हृत्यावोक्ष्य तं देशम्, अमत्रेभ्यो *(=पात्रेभ्यो)* लेपान्संकृष्याद्भिः संसृज्योत्तरतः शुचौ देशे रुद्राय निनयेत् । एवं वास्तु शिवं भवति २३

## उच्छिष्टे③

**1/11/31/22**— नाब्राह्मणायोच्छिष्टं प्रयच्छेत् ।
यदि प्रयच्छेद् - दन्तान् स्कुप्त्वा, तस्मिन्न् अवधाय प्रयच्छेत् २२

ब्रह्मचर्ये भोजनम्, भोज्याभोज्य-विवेकः, पाक-प्रतिग्रहादौ विधिनिषेधाः च+ अन्यत्रोक्ताः।

## भोज्यता द्रव्यजन्या③

### उत्तमः कल्पः④

**2/08/18/01**— विलयनं *(=नवनीत-मलम्)*, मथितं, पिण्याकं, *(=तैलोत्पादनावशेषः)* मधु, मांसं च वर्जयेत् १

**2/08/18/02**— कृष्ण-धान्यं, शूद्रान्नं, ये चान्ये नाश्य-संमताः २

**2/08/18/03**— अहविष्यम्, अनृतं, क्रोधं,
येन च क्रोधयेत् ।
स्मृतिम् इच्छन् यशो मेधां स्वर्गं पुष्टिं द्वादशैतानि *(प्राक्तनसूत्रोक्त-सहितानि)* वर्जयेत् ३

## अभोज्येषु④

**1/05/16/16**— हिंसार्थेनासिना मांसं छिन्नमभोज्यम् १६

**1/05/16/23**— यस्मिंश् चान्ने केशः स्यात् *(पाकावस्थायां सति भिन्ना वार्ता)* २३

**1/05/16/24**— अन्यद् वामेध्यम् २४

**1/05/16/25**— अमेध्यैर् अवमृष्टम् २५

**1/05/16/26**— कीटो वामेध्य-सेवी २६

**1/05/16/27**— मूषकलाङ्गं वा २७

**1/05/17/17**— कृतान्नं पर्युषितम् अखाद्यापेयानाद्यम् १७

**1/05/17/18**— शुक्तं*(=काल-पकेनाऽम्लीभूतं)* च १८

**1/05/17/19**— फाणित*(=शर्कररस)*-पृथुक*(=चिउडा)*-तण्डुल-करम्ब*(=दधि+शक्तु)*-भरुज*(=भ्रष्टयव)*-सक्तु-शाक-मांस-पिष्ट-क्षीर-विकारौषधि-वनस्पति-मूल-फल-वर्जम् १९

**1/05/17/20**— शुक्तं चापरयोगम् २०

**1/05/17/21**— सर्वं मद्यमपेयम् २१

**1/05/17/22**— तथैलकं पयः २२

**1/05/17/23**— उष्ट्रीक्षीर-मृगीक्षीर-सन्धिनीक्षीर-यमसूक्षीराणीति २३

**1/05/17/24**— धेनोश्चानिर्दशायाः *(प्रसवाद् १० दिनेभ्यः प्राक्)* २४

**1/05/17/25**— तथा कीलालौषधीनां च २५

**1/05/17/26**— करञ्ज-पलण्डु-परारीकाः २६

**1/05/17/27**— यच्चान्यत् परिचक्षते २७

**1/05/17/28**— क्याक्वभोज्यमिति हि ब्राह्मणम् २८

**1/05/17/29**— एकखुरोष्ट्रगवयग्रामसूकरशरभगवाम् २९

**1/05/17/30**— धेनु+अनडुहोर्भक्ष्यम् ३०

**1/05/17/31**— मेध्यमानडुहमिति वाजसनेयकम् ३१

**1/05/17/32**— कुक्कुटो विकिराणाम् *(=खनित्वा कीटान्यश्नन्ति ये तेषु, अभक्ष्यम्)* ३२

**1/05/17/33**— प्लवः प्रतुदाम् ३३

**1/05/17/34**— क्रव्यादः ३४

**1/05/17/35**— हंसभासचक्रवाकसुपर्णाश्च ३५

**1/05/17/36**— क्रुञ्च-क्रौञ्च-वार्ध्राणस-लक्ष्मण-वर्जम् *(अभक्ष्यम्)* ३६

**1/05/17/37**— पञ्चनखानां गोधा-कच्छप-श्वाविट्-शल्यक-खण्ग-शश-पूतिखष-वर्जम् ३७

**1/05/17/39**— सर्पशीर्षी मृदुरः क्रव्यादो ये चान्ये विकृता यथा मनुष्यशिरसः ३९

**2/08/20/10**— आत्त-तेजसां भोजनं वर्जयेत् १०

**2/04/09/07**— उपेतः स्त्रीणामनुपेतस्य चोच्छिष्टं वर्जयेत् ७

## विपदि④

**1/06/18/05**— न सुभिक्षाः स्युः ५

**1/06/18/06**— स्वयमप्यवृत्तौ सुवर्णं दत्त्वा पशुं वा भुञ्जीत ६

**1/06/18/07**— नात्यन्तमन्ववस्येत् ७

**1/06/18/08**— वृत्तिं प्राप्य विरमेत् ८

**1/06/18/14**— *(शूद्रस्य)* तस्यापि धर्मोपनतस्य *(= धर्मार्थम् आश्रितस्य)* १४

**1/06/18/15**— सुवर्णं दत्वा पशुं वा भुञ्जीत नात्यन्तमन्ववस्येद्वृत्तिं प्राप्य विरमेत् १५

## भोज्यता परिकरजन्या③

## पाचक-परिवेषक-पङ्क्त्यादौ④

**1/05/16/21**— अप्रयतोपहतम् अन्नम् अप्रयतं, न त्व् अभोज्यम् २१

**विश्वास-टिप्पनी**— अप्रयतम् अन्नम्
अग्नाव् अधिश्रितम्
अद्भिः प्रोक्षितं
भस्मना मृदा वा संस्पृष्टं
वाचा च प्रशस्तं
प्रयतं भवति
भोज्यं च ।

**1/05/16/22**— अप्रयतेन तु शूद्रेणोपहृतम् अभोज्यम् २२

**1/05/16/28**— पदा वोपहतम् २८

**1/05/16/29**— सिचा *(वस्त्राञ्चलेन)* वा २९

**1/05/16/30**— शुना वापपात्रेण वा दृष्टम् ३०

**1/05/16/31**— सिचा वोपहृतम् ३१

**1/05/16/32**— दास्या वा नक्तमाहृतम् ३२

**1/05/16/33**— भुञ्जानं वा ३३

**1/05/17/01**— यत्र शूद्र उपस्पृशेत् १

**1/05/17/02**— अनर्हद्भिर्वा समानपङ्क्तौ २

**1/05/17/03**— भुञ्जानेषु व यत्रानूत्थायोच्छिष्टं प्रयच्छेदाचामेद्वा ३

**1/05/17/04**— कुत्सयित्वा वा यत्रान्नं दद्युः ४

**1/05/17/05**— मनुष्यैरवघ्रातमन्यैर्वामेध्यैः ५

**2/02/03/02**— भाषां कासं क्षवयुमित्यभिमुखो ऽन्नं वर्जयेत् २

**2/02/03/03**— केशानङ्गं वासश्चालभ्याप उपस्पृशेत् ३

**2/02/03/04**— आर्याधिष्ठिता वा शूद्राः संस्कर्तारः स्युः ४

**2/02/03/05**— तेषां स एवाचमनकल्पः ५

**2/02/03/06**— अधिकमहरहः केशश्मश्रुलोमनखवापनम् ६

**2/02/03/07**— उदकोपस्पर्शनं च सह वाससा ७

**2/02/03/08**— अपि वाष्टमीष्वेव पर्वसु वा वपेरन् ८

# पाके④

**2/06/15/13**— यस्याग्नौ न क्रियते यस्य चाग्रं न दीयते न तद्भोक्तव्यम् १३

# दातरि④

**1/05/17/14**— नाऽऽपणीयम् *(पक्वं)* अन्नम् अश्नीयात् १४

**1/05/17/15**— तथा *(ऽऽपणियान्)* रसान् *(नाश्नीयात्)*, आम*(=अपक्व)*-मांस-मधु-लवणानीति परिहाप्य १५

**1/05/17/16**— तैल-सर्पिषी तूपयोजयेद् उदकेऽवधाय १६

**1/06/18/01**— मध्वामं मार्गं मांसं भूमिर् मूलफलानि रक्षा-गव्यूतिर्-निवेशनं युग्यघासश् चोग्रतः प्रतिगृह्याणि १

**1/06/18/02**— एतान्यपि नानन्तेवास्याहृतानीति हारीतः २

**1/06/18/03**— आमं वा गृह्णीरन् ३

**1/06/18/04**— कृतान्नस्य वा विरसस्य ४

**1/06/18/09**— त्रयाणां वर्णानां क्षत्रियप्रभृतीनां समावृत्तेन न भोक्तव्यम् ९

**1/06/18/13**— सर्ववर्णानां स्वधर्मे वर्तमानानां भोक्तव्यं, शूद्र-वर्जमित्येके १३

**1/06/18/11**— यत्राप्रायश्चित्तं कर्मासेवते प्रायश्चित्तवति ११

**1/06/18/12**— चरितनिर्वेषस्य भोक्तव्यम् १२

**1/06/18/16**— सङ्घान्नमभोज्यम् १६

**1/06/18/17**— परिक्रुष्टं *(=सर्वान् भोजनार्थम् आह्वान्ति ये)* च १७

**1/06/18/18**— सर्वेषां च शिल्पाजीवानाम् १८

**1/06/18/19**— ये च शस्त्रमाजीवन्ति १९

**1/06/18/20**— ये चाधिम् *(भाटकग्राहकाः)* २०

**1/06/18/21**— भिषक् २१

**1/06/18/22**— वार्धुषिकः *(वृद्ध्युपजीविनः)* २२

**1/06/18/23**— दीक्षितोऽक्रीतराजकः २३

**1/06/18/24**— अग्नीषोमीयसंस्थायामेव २४

**1/06/18/25**— हुतायां वा वपायां दीक्षितस्य भोक्तव्यम् २५

**1/06/18/26**— यज्ञार्थे वा निर्दिष्टे शेषाद्भुञ्जीरन्न् इति हि ब्राह्मणम् २६

**1/06/18/27**— क्लीबः २७

**1/06/18/28**— राज्ञां प्रैषकरः २८

**1/06/18/29**— अहविर्याजी २९

**1/06/18/30**— चारी ३०

**1/06/18/31**— अविधिना च प्रव्रजितः ३१

**1/06/18/32**— यश्चाग्नीनपास्यति ३२

**1/06/18/33**— यश्च सर्वान्वर्जयते, सर्वान्नी च श्रोत्रियो *(ऽपि)*, निराकृतिर् *(=अस्वाध्यायः)* वृषलीपतिः ३३

**1/06/19/01**— मत्त उन्मत्तो बद्धो ऽणिकः*(=पुत्राच् छुतग्राही)* प्रत्युपविष्टो*(?)* यश्च प्रत्युपवेशयते तावन्तं कालम् १ ...

**1/06/19/02**— क अश्यान्नः २

**1/06/19/03**— य ईप्सेद*(=प्रार्थ्यते [भोक्तव्यमिति, तस्यान्न])* इति कण्वः ३

**1/06/19/04**— पुण्य *(अन्न)* इति कौत्सः ४

**1/06/19/05**— यः कश्चिद् दद्यादिति वार्ष्यायणिः *(आपस्तम्बेनायम् पक्षो निराकरिष्यते ऽग्रे)*५

**1/06/19/06**— यदि ह रजः *(=पापम्)* स्थावरं - पुरुषे भोक्तव्यम्, अथ चेच् चलं - दानेन निर्दोषो भवति ६

**1/06/19/07**— शुद्धा भिक्षा भोक्तव्या *(इति)* एककुणिकौ काण्वकुत्सौ तथा पुष्करसादिः ७

**1/06/19/08**— सर्वतोपेतं *(=अप्रार्थ्य लब्धम् भोज्यमिति)* वार्ष्यायणीयम् *(मतम् - आपस्तम्बो निराकरिष्यत्यग्रे)*८

**1/06/19/09**— पुण्यस्येप्सतो *(ऽन्नस्य)* भोक्तव्यम् *(इत्यापस्तम्बनिश्चयः)* ९

**1/06/19/10**— पुण्यस्याप्य् *(दातुम्)* अनीप्सतो न भोक्तव्यम् १०

**1/06/19/11**— यतः कुतश्चाभ्युद्यतं भोक्तव्यम् ११

**1/06/19/12**— नाननियोगपूर्वमिति हारीतः १२

**1/06/19/13**— अथ पुराणे श्लोकावुदाहरन्ति । उद्यतामाहृतां भिक्षां पुरस्तादप्रवेदिताम् । भोज्यां मेने प्रजापतिरपि दुष्कृतकारिणः । न तस्य पितरोऽश्नन्ति दश वर्षाणि पञ्च च । न च हव्यं वहत्यग्निर्यस्तामभ्यधिमन्यत इति १३

**1/06/19/14**— चिकित्सकस्य मृगयोः शल्यकृन्तस्य पाशिनः । कुलटायाः षण्ढकस्य च तेषामन्नमनाद्यम् १४

**1/06/19/15**— अथाप्युदाहरन्ति । अन्नादे भ्रूणहा मार्ष्टि अनेना अभिशंसति । स्तेनः प्रमुक्तो राजनि याचन्ननृतसङ्कर इति १५

## ब्रह्मयज्ञः②

## विधानम्③

**1/04/12/01**— तपः स्वाध्याय इति ब्राह्मणम् १

**1/04/12/02**— तत्र श्रूयते । स यदि तिष्ठन्न् आसीनः शयानो वा स्वाध्यायमधीते तप एव तत्तप्यते तपो हि स्वाध्याय इति २

### क्रमः③

**1/03/11/21**— नित्यप्रश्नस्य चाविधिना २१

**1/03/11/22**— तस्य विधिः २२

**1/03/11/23**— अकृतप्रातराश उदकान्तं गत्वा प्रयतः शुचौ देशेऽधीयीत यथाध्यायम् उत्सृजन् वाचा २३

**1/03/11/24**— मनसा चानध्याये २४

**1/03/11/25**— विद्युति चाभ्यग्रायां स्तनयित्नाव् अप्रायत्ये प्रेतान्ने नीहारे च मानसं परिचक्षते २५

**1/03/11/26**— श्राद्धभोजन एवैके २६

## रात्रौ④

**1/11/32/12**— अनध्यायो निशायाम् *(=रात्रेर् मध्यभागः)* - अन्यत्र धर्मोपदेशाच् छिष्येभ्यः १२

**1/11/32/13**— मनसा वा स्वयम् *(अधीयीत)*॥ १३ ॥

**1/11/32/14**— ऊर्ध्वम् अर्धरात्राद् अध्यापनम् १४

**1/11/32/15**— नापरसात्रम् उत्थायानध्याय इति संविशेत् १५

**1/11/32/16**— कामम् *(स्तम्बादिषु लीनः)* अपश्-शयीत १६

**1/11/32/17**— मनसा वाधीयीत १७

*(अन्यत्रोक्तः - अनध्याय-विषयः)*

## दीवनम्②

**2/09/25/12**— सभाया मध्ये ऽधिदेवनमुद्धत्या ऽऽवोक्ष्या ऽऽक्षान् निवपेद् युग्मान् वैभीतकान्यथार्थान् १२

**2/09/25/13**— आर्याः शुचयः सत्यशीला दीवितारः स्युः १३

## लोकसङ्ग्रहः②

**2/08/20/21**— संग्रहीता च मनुष्यान् *(हितवचनादिभिः)* २१

## मैथुनम्②

## विधिः③

**1/11/32/02**— मिथुनी-भूय च, न तया सह सर्वां रात्रिं शयीत २

**2/01/01/21**— यावत्संनिपातं चैव सहशय्या २१

**2/01/01/22**— ततो नाना २२

**2/01/01/23**— उदकोपस्पर्शनम् २३

**2/01/02/01**— अपि वा लेपान्प्रक्षाल्याचम्य प्रोक्षणमङ्गानाम् १

**2/01/01/20**— स्त्रीवाससैव संनिपातः स्यात् २०

## कालनियमाः③

**1/11/30/19**— तथा ष्ठेवन-मैथुनयोः कर्माप्सु वर्जयेत् १९

**2/01/01/16**— अहन्यसंवेशनम् १६

**1/11/32/01**— प्रवचन-युक्तो वर्षा-शरदं मैथुनं वर्जयेत् १

*(पर्वनियमाः विशेषव्रतनियमाश्च पृथग् उक्ताः।)*

## नित्यकर्मत्वम्③

**1/11/32/06**— सदा निशायां दारं प्रत्य् अलंकुर्वीत ६

…
**1/11/32/05**— अन्-आविः*(भूत)*-स्रग्-अनुलेपणः स्यात् ५

**2/01/01/17**— ऋतौ च संनिपातो दारेणानुव्रतम् १७

**2/01/01/18**— अन्तरालेऽपि दार एव १८

**2/01/01/19**— ब्राह्मणवचनाच्च संवेशनम् १९

## पात्रनियमः③

**2/06/13/03**— पूर्ववत्याम्, असंस्कृतायां, वर्णान्तरे च मैथुने दोषः ३

**2/06/13/04**— तत्रापि दोषवान्पुत्र एव ४

## ऊर्ध्वरेतः-प्रशंसा-निन्दने③

**2/09/23/03**— अथ पुराणे श्लोकाव् उदाहरन्ति ३

**2/09/23/04**— अष्टाशीति-सहस्राणि ये
प्रजाम् ईशिर *(=अभ्यनन्दन्)* ऋषयः ।
दक्षिणेनार्यम्णः पन्थानं
ते श्मशानानि भेजिरे ४

**2/09/23/05**— अष्टाशीतिसहस्राणि ये प्रजां नेषिरर्षयः ।
उत्तरेणार्यम्णः पन्थानं तेऽमृतत्वं हि कल्पते ५

**2/09/23/06**— इत्यूर्ध्वरेतसां *(=गृहस्थेतरेषाम्)* प्रशंसा ६

**2/09/23/07**— अथापि संकल्प-सिद्धयो *(=सङ्कल्पत एव सिद्धिः)* भवन्ति ७

**2/09/23/08**— यथा वर्षं, प्रजा-दानं,
दूरे दर्शनं, मनो-जवता,
यच्चान्यद् एवं युक्तम् ८

**2/09/23/09**— तस्माच् छ्रुतितः, प्रत्यक्ष-फलत्वाच् च
विशिष्टान् आश्रमान् एतान् एके ब्रुवते ९

**2/09/23/10**— त्रैविद्य-वृद्धानां तु
वेदाः प्रमाणम्
इति निष्ठा।
तत्र यानि श्रूयन्ते
व्रीहि-यव-पश्व्-आज्य-पयः-कपाल-पत्नी-संबन्धान्य्
उच्चैर् नीचैः कार्यम् इति
तैर् विरुद्ध आचारो ऽप्रमाणम् इति मन्यन्ते १०

**2/09/23/11**— यत् तु श्मशानम् उच्यते
*("दक्षिणेनार्यम्णः पन्थानं ते श्मशानानि भेजिरे" इत्यस्मिन्)*
नाना-कर्मणाम् एषोऽन्ते पुरुष-संस्कारो विधीयते ११

**2/09/23/12**— ततः परम् अनन्त्यं फलं स्वर्ग्य-शब्दं श्रूयते १२

**2/09/24/14**— स्यात् तु कर्मावयवेन तपसा वा कश्चित् सशरीरो ऽन्वन्तं लोकं जयति, सङ्कल्पसिद्धिश् च स्यान् - न तु तज् ज्यैष्ठ्यम् आश्रमाणाम् १४

## निद्रा②

**1/11/32/11**— आ *(मध्य)*निशाया जागरणम् *(स्यात्)* ११

**1/11/32/15**— नापररात्रम् उत्थायानध्याय इति संविशेत् १५

**1/11/32/16**— कामम् *(स्तम्बादिषु लीनः)* अपश्-शयीत १६

**1/11/32/17**— मनसा वाधीयीत १७

## सन्ध्या-निद्रा-प्रायश्चित्तम्③

**2/05/12/13**— स्वपन्न् अभिनिम्रुक्तो *(=सूर्यास्तसमये निद्रालुः)* नाश्वान् *(=अनश्नन्)* वाग्यतो रात्रिमासीत । श्वोभूत उदकमुपस्पृश्य वाचं विसृजेत् १३

**2/05/12/14**— स्वपन्न् अभ्युदितो *(नाम सूर्योदये निद्रालुः)* नाश्वान्*(=अनश्नन्)* वाग्यतोऽहस्तिष्ठेत् १४

**2/05/12/15**— आतमितोः प्राणमायच्छेदित्येके *(तावद् वा प्राणान् आयमयेद् यावद् अङ्ग्लानिर् न स्यात्)*१५

## दुःस्वप्ने③

**2/05/12/15**— आतमितोः प्राणमायच्छेदित्येके *(तावद् वा प्राणान् आयमयेद् यावद् अङ्गलानिर् न स्यात्)*१५

**2/05/12/16**— स्वप्नं वा पापकं दृष्ट्वा १६

## प्रयाणम्②

## विधिः③

**1/11/31/21**— न कुसृत्या ग्रामं प्रविशेत् ।
यदि प्रविशेन् "नमो रुद्राय वास्तोष्पतय" इत्येताम् ऋचं जपेद् अन्यां वा रौद्रीम् २१

## वर्जनीय-स्थानानि③

**1/11/32/21**— नगर-प्रवेशनानि च वर्जयेत् २१

## यानेषु③

**1/11/32/25**— गार्दभं यानम् आरोहणे,
विषमारोहणावरोहणानि च वर्जयेत् २५

**1/11/32/26**— बाहुभ्यां च नदी-तरम् २६

**1/11/32/27**— नावां च सांशयिकीम् *(वर्जयेत्)*२७

## +शौचम्②

## आत्मा③

## चोदनम्, फलम्④

**1/08/22/01**— अध्यात्मिकान् योगान् अनुतिष्ठेन् न्याय-संहितान् अनैश्चारिकान् १

**1/08/22/02**— आत्म-लाभान् न परं विद्यते २

**2/09/21/13**— सत्यानृते सुखदुःखे वेदानिमं लोकममुं च परित्यज्यात्मानम् अन्विच्छेत् १३

**2/09/21/14**— बुद्धे क्षेम-प्रापणम् १४

**2/09/21/15**— तच् छास्त्रैर् विप्रतिषिद्धम् १५

**2/09/21/16**— बुद्धे चेत्क्षेमप्रापणम्
इहैव न दुःखम् उपलभेत १६

**2/09/21/17**— एतेन परं *(=पारलौकिकं [दुःखं])* व्याख्यातम् *(न स्वैरचारिणां निवर्तत इति)*१७

## आत्मा④

**1/08/22/03**— तत्रात्मलाभीयाञ् श्लोकान् उदाहरिष्यामः ३

**1/08/22/04**— पूः प्राणिनः सर्व एव गुहाशयस्य । अहन्यमानस्य विकल्मषस्य ।
अचलं चलनिकेतं येऽनुतिष्ठन्ति तेऽमृताः ४

**1/08/22/05**— यदिदमिदिहेदिह लोके विषयमुच्यते । विधूय कविरेतदनुतिष्ठेद्गुहाशयम् ५

**1/08/22/06**— आत्मन्न् एवाहमलब्ध्वैतद्धितं सेवस्व नाहितम् । अथान्येषु प्रतीच्छामि साधुष्ठानमनपेक्षया । महान्तं तेजसस्कायं सर्वत्र निहितं प्रभुम् ६

**1/08/22/07**— सर्वभूतेषु यो नित्यो विपश्चिदमृतो ध्रुवः । अनङ्गो ऽशब्दोऽशरीरोऽस्पर्शश्च महाञ्शुचिः । स सर्वं परमा काष्ठा स वैषुवतं स वै वैभाजनं पुरम् ७

**1/08/22/08**— तं योऽनुतिष्ठेत्सर्वत्र प्राध्वं चास्य सदाचरेत् । दुर्दर्शं निपुणं युक्तो यः पश्येत्स मोदेत विष्टपे ८

**1/08/23/01**— आत्मन् पश्यन् सर्वभूतानि न मुह्येच्चिन्तयन्कविः । आत्मानं चैव सर्वत्र यः पश्येत्स वै ब्रह्मा नाकपृष्ठे विराजति १

**1/08/23/02**— निपुणोऽणीयान्बिसोर्णाया यः सर्वमावृत्य तिष्ठति । वर्षीयांश्च पृथिव्या ध्रुवः सर्वमारभ्य तिष्ठति । स इन्द्रियैर्जगतोऽस्य ज्ञानादन्योऽनन्यस्य ज्ञेयात्परमेष्ठी विभाजः । तस्मात्कायाः प्रभवन्ति सर्वे स मूलं शाश्वतिकः स नित्यः २

## सन्न्यास-नियमाः④

**2/09/21/07**— अथ परिव्राजः ७

**2/09/21/08**— अत एव ब्रह्मचर्यवान्प्रव्रजति ८

**2/09/21/09**— तस्योपदिशन्ति ९

**2/09/21/10**— अनग्निर् अनिकेतः स्याद्
अशर्माशरणो मुनिः
स्वाध्यायैवोत्सृजमानो वाचं
ग्रामे प्राण-वृत्तिं प्रतिलभ्य
+अनिहो ऽनमुत्रश् चरेत् १०

**2/09/21/11**— तस्य मुक्तम् *(=त्यक्तम्)* आच्छादनं विहितम् ११

**2/09/21/12**— सर्वतः *(विधितो निषेधतश्च)* परिमोक्षम् एके १२

## योग-विधिः④

*(साधारणधर्माः आश्रम-पङ्क्ताव् उक्ताः)*

**1/08/23/03**— दोषाणां तु विनिर्घातो योगमूल इह जीविते । निर्हृत्य भूतदाहीयान् क्षेमं गच्छति पण्डितः ३

**2/02/05/19**— मनसा वाचा प्राणेन चक्षुषा श्रोत्रेण त्वक्शिश्नोदरारम्भनणानास्रावान्परिवृञ्जानो ऽमृतत्वाय कल्पते १९

# दण्डनम्③

## साधारण-दण्डन-विधिः④

**2/05/11/01**— इतरेषां वर्णानामा प्राणविप्रयोगात्समवेक्ष्य तेषां कर्माणि राजा दण्डम्प्रणयेत् १

**2/05/11/02**— न च संदेहे दण्डं कुर्यात् २

**2/05/11/03**— सुविचितं विचित्या दैवप्रश्नेभ्यो राजा दण्डाय प्रतिपद्येत ३

**2/05/11/04**— एवंवृत्तो राजोभौ लोकावभिजयति ४

**2/10/27/18**— नियमातिक्रमणमन्यं वा रहसि बन्धयेत् १८

**2/10/27/19**— आ समापत्तेः १९

**2/10/27/20**— असमापत्तौ नाश्यः २०

**2/10/27/21**— आचार्य, ऋत्विक्, स्नातको, राजेति त्राणं *(=दण्डन-ह्रासनम् "अहं वारयामीमम्" इति)* स्युर् - अन्यत्र वध्यात् २१

**2/11/28/12**— अदण्ड्यः कामकृते तथा प्राणसंशये भोजनमाददानः १२

**2/11/28/13**— प्राप्तनिमित्ते दण्डाकर्मणि राजानमेनः स्पृशति १३

## ब्राह्मण-दण्डनम्④

**2/05/10/12**— न्यस्तायुधप्रकीर्णकेशप्राञ्जलिपराङावृत्तानामार्या वधं परिचक्षते ११

**2/05/10/13**— शास्त्रैरधिगतानामिन्द्रि यदौर्बल्याद्विप्रतिपन्नानां शास्ता निर्वेषमुपदिशेद्यथाकर्म यथोक्तम् १२

**2/05/10/14**— तस्य चेच्छास्त्रमतिप्रवर्तेरन्राजानं गमयेत् १३

**2/05/10/15**— राजा पुरोहितं धर्मार्थकुशलम् १४

**2/05/10/16**— स ब्राह्मणान्नियुञ्ज्यात् १५

# स्तेये④

*(शूद्रः)*
**2/10/27/16**— पुरुषवधे स्तेये भूम्यादान इति स्वान्यादाय वध्यः १६

**2/10/27/17**— चक्षुनिरोधस्त्वेतेषु ब्राह्मणस्य १७

**2/11/28/10**— परपरिग्रहमविद्वानाददान एधोदके मूले पुष्पे फले गन्धे ग्रासे शाक इति वाचा बाध्यः १०

**2/11/28/11**— विदुषो वाससः परिमोषणम् ११

## स्तेनः *(ब्रह्मस्वापहारः)*⑤

**1/09/25/04**— स्तेनः प्रकीर्णकेशोऽए मुसलमादाय राजानं गत्वा कर्माचक्षीत । तेनैनं हन्याद्वधे मोक्षः ४

**1/09/25/05**— अनुज्ञातेऽनुज्ञातारमेनः ५

**1/09/25/06**— अग्निं वा प्रविशेत्तीक्ष्णं वा तप आयच्छेत् ६

**1/09/25/07**— भक्तापचयेन वात्मानं समाप्नुयात् ७

**1/09/25/08**— कृच्छ्रसंवत्सरं वा चरेत् ८

**1/09/25/09**— अथाप्युदाहरन्ति । स्तेयं कृत्वा सुरां पीत्वा गुरुदारं च गत्वा ब्रह्महत्यामकृत्वा चतुर्थकाला मितभोजनाः स्युरपोऽभ्यवेयुः सवनानुकल्पम् ९

**1/09/25/10**— स्थानासनाभ्यां विहरन्त एते त्रिभिर्वर्षैरप पापं नुन्दते १०

**1/09/26/05**— स्त्रीणां चैवम् ५

# पतनीये दण्डः④

**1/07/21/20**— दोषं बुद्ध्वा
न पूर्वः परेभ्यः पतितस्य समाख्याने स्याद्,
वर्जयेत् त्व् एनं धर्मेषु २०

**1/10/28/06**— न पतितमाचार्यं ज्ञातिं वा दर्शनार्थो गच्छेत् ६

**1/10/28/07**— न चास्माद्भोगानुपयुञ्जीत ७

**1/10/28/08**— यदृच्छासंनिपात उपसंगृह्य तूष्णीं व्यतिव्रजेत् ८

**1/10/28/09**— माता पुत्रत्वस्य भूयांसि कर्माण्यारभते तस्यां शुश्रूषा नित्या पतितायामपि ९

**1/10/28/10**— न तु धर्मसंनिपातः स्यात् १०

**1/10/29/08**— अथाभिशस्ताः समवसाय
पतित-पुत्रेषु चरेयुर् धार्म्यम् इति
सांशित्येतरेतर-याजका इतरेतराध्यापका मिथो विवहमानाः ८

**1/10/29/09**— पुत्रान्संनिष्पाद्य ब्रूयुर् -
"विप्रव्रजततास्मद् -
एवं ह्य् अस्मत्स्व् आर्याः संप्रत्यपत्स्यते"ति ९

**1/10/29/10**— अथापि न सेन्द्रि यः पतति १०

**1/10/29/11**— तदेतेन वेदितव्यम् । अङ्गहीनो हि साङ्गं जनयति ११

**1/10/29/12**— मिथ्यैतदिति हारीतः १२

**1/10/29/13**— दधिधानीसधर्मा स्त्री भवति १३

**1/10/29/14**— यो हि दधिधान्यामप्रयतं पय आतच्य मन्थति न तेन धर्मकृत्यं क्रियते । एवमशुचि शुक्लं यन्निवर्तते न तेन सह संप्रयोगो विद्यते १४

## अगौरव-दर्शने④

**2/10/27/15**— वाचि पथि शय्यायाम् आसन इति समीभवतो दण्डताडनम् *(शूद्रस्य)*१५

पुरुषवधे स्तेये भूम्यादान इति स्वान्यादाय वध्यः १६

## इन्द्रिय-नियमनम्③

**1/11/31/18**— उद्यन्तम् अस्तं यन्तं चादित्यं दर्शने वर्जयेत् १८

## स्पर्शे④

**1/11/31/06**— ब्राह्मणस्य गोर् इति पदोपस्पर्शनं वर्जयेत् ६

**1/11/31/07**— हस्तेन चाकारणात् ७

## गमने④

**1/11/31/13**— वत्स-तन्तीं च नोपरि गच्छेत् १३

**1/11/31/14—** प्रेङ्खाव्*(=डोलास्तम्भौ)* अन्तरेण च नातीयात् १४

(... पथि + अवकाशदानादिकम् "गौरवदर्शन"-पङ्क्ताव् उक्तम्।)

## पादस्थितौ④

**1/11/30/22—** अग्निम्, अपो, ब्राह्मणं, गा, देवता, द्वारं, प्रतीवातं च शक्ति-विषये नाभिप्रसारयीत *(पादौ)*२२

**2/08/20/11—** भस्म-तुषाधिष्ठानम् ११

**2/08/20/12—** पदा पादस्य प्रक्षालनम् अधिष्ठानं च वर्जयेत् १२

**2/08/20/13—** प्रेङ्खोलनं च पादयोः १३

**2/08/20/14—** जानुनि चात्याधानं जङ्घायाः १४

## क्रियान्तराणि④

**1/11/32/28—** तृण-च्छेदन-लोष्ट-विमर्दनाष्ठेवनानि चाकारणात् २८

**1/11/32/29—** यच् चान्यत् परिचक्षते, यच् चान्यत् परिचक्षते २९

**2/05/12/12—** पृष्ठतश्चात्मनः पाणी न संश्लेषयेत् १२

**2/08/20/15—** नखैश् च नखवादनम् १५

**2/08/20/16—** स्फोटनानि चाकारणात् १६

**2/08/20/17—** यच् चान्यत् परिचक्षते १७

## मूत्र-निष्कासनम्③

**1/11/30/15—** शिरस् तु प्रावृत्य मूत्र-पुरीषे कुर्याद् - भूम्यां किंचिद् *(तृणादि)* अन्तर्धाय १५

**1/11/30/15—** शिरस् तु प्रावृत्य मूत्र-पुरीषे कुर्याद् - भूम्यां किंचिद् *(तृणादि)* अन्तर्धाय १५

**1/11/30/16—** छायायाम् मूत्रपुरीषयोः कर्म वर्जयेत् १६

**1/11/30/17—** स्वां तु छायाम् अव-मेहेत् १७

**1/11/30/20—** अग्निम् आदित्यम् अपो ब्राह्मणं गा देवताश् चाभिमुखो मूत्र-पुरीषयोः कर्म वर्जयेत् २०

**1/11/30/21**— अश्मानं, लोष्टम्,
आर्द्रान् ओषधि-वनस्पतीन्*(←पुष्पैर् विना फलन्ति)* ऊर्ध्वान् *(→वातादिभिर् अभग्नान्)* आच्छिद्य,
मूत्र-पुरीषयोः शुन्धने वर्जयेत् २१

**1/11/30/23**— अथाप्य् उदाहरन्ति *(ऽग्रे वक्ष्यमाणम्)* २३

**1/11/31/01**—

> प्राङ्-मुखो ऽन्नानि भुञ्जीत
> उच्चरेद् दक्षिणा-मुखः ।
> उदङ्-मुखो मूत्रं कुर्यात्
> प्रत्यक्-पादावनेजनम्

इति १

**1/11/31/02**— आराच् चावसथान् मूत्रपुरीषे कुर्याद्, दक्षिणां दिशं दक्षिणापरां वा २

**1/11/31/03**— अस्तम् इते च
बहिर् ग्रामाद्,
आराद् आवसथाद् वा मूत्रपुरीषयोः कर्म वर्जयेत् ३

# ष्ठेवनम्④

**1/11/30/19**— तथा ष्ठेवन-मैथुनयोः कर्माप्सु वर्जयेत् १९

# नियमाः③

# नियमाः④

**1/02/05/01**— नियमेषु तपःशब्दः १

**1/02/05/02**— तद्-अतिक्रमे विद्या-कर्म निःस्रवति ब्रह्म सहापत्याद् एतस्मात् २

**1/02/05/03**— कर्तपत्यम् अनायुष्यं च ३

**1/02/05/04**— तस्माद् ऋषयो ऽवरेषु न जायन्ते नियमाति-क्रमात् ४

**1/02/05/05**— श्रुतर्षयस्तु भवन्ति केचित्कर्मफलशेषेण पुनःसंभवे ५

**1/02/05/06**— यथा श्वेतकेतुः ६

# व्रतानि④

**2/08/18/04**— अधो-नाभ्य्--उपरि-जान्व्-आच्छाद्य त्रि-षवणम् उदकम् उपस्पृशन्न्
अनग्नि-पक्व-वृत्तिर् अच्छायोपगः स्थानासनिकः संवत्सरम् एतद् व्रतं चरेत् ।
एतद् अष्टा-चत्वारिंशत् संमितम् इत्य् आचक्षते ४

ऊर्ध्वरेतो-विषयो ऽन्यत्रोक्तः।

## पर्व③

**1/11/31/19**— दिवादित्यः सत्त्वानि गोपायति,
नक्तं चन्द्रमास्,
तस्माद् अमावास्यायां निशायां स्वाधीय*(=साधीय)* आत्मनो गुप्तिम् इच्छेत्
प्रायत्य-ब्रह्मचर्य-काले चर्यया च १९

**1/11/31/20**— सह ह्य् एतां रात्रिं सूर्याचन्द्रमसौ वसतः २०

## गृहस्थेषु④

**2/01/01/04**— पर्वसु चोभयोर् उपवासः ४

**2/01/01/05**— औपवस्तम् एव कालान्तरे भोजनम् ५

**2/01/01/06**— तृप्तिश् चान्नस्य ६

**2/01/01/07**— यच्चैनयोः प्रियं स्यात् तद् एतस्मिन्न् अहनि भुञ्जीयाताम् ७

**2/01/01/08**— अधश्च शयीयाताम् ८

**2/01/01/09**— मैथुनवर्जनं च ९

**2/01/01/10**— श्वोभूते स्थालीपाकः १०

**2/01/01/11**— तस्योपचारः पार्वणेन व्याख्यातः ११

## प्राणायामः③

**2/05/12/15**— आतमितोः प्राणमायच्छेदित्येके *(तावद् वा प्राणान् आयमयेद् यावद् अङ्गग्लानिर् न स्यात्)*१५

**2/05/12/17**— अर्थं वा सिषाधयिषन् १७

## प्रायश्चित्तम्③

पतनीयेषु, यभनेषु च प्रायश्चित्तम् अन्यत्रोक्तम्।

## साधारण-विधिः④

**2/06/15/12**— देशतः *(→तीर्थस्थानेषु)* कालतः *(→ग्रहणादौ)* शौचतः *(→कृच्छ्रादेर् अन्ते)* सम्यक् प्रतिग्रहीतृत इति दानानि प्रतिपादयति १२

## पतनीयेषु④

**1/10/28/11**— अधर्माहृतान् भोगान् अनुज्ञाय
न वयं चाधर्मश् चेत्य् अभिव्याहृत्या
ऽधोनाभ्य् उपरिजान्व् आछाद्य
त्रिषवणम् उदकम् उपस्पृशन्न्
अक्षीराक्षारालवणं भुञ्जानो
द्वादश वर्षाणि नागारं प्रविशेत् ११

**1/10/28/12**— ततः सिद्धिः १२

**1/10/28/13**— अथ संप्रयोगः स्याद् आर्यैः १३

**1/10/28/14**— एतद् एवान्येषाम् अपि पतनीयानाम् १४

### सुरा⑤

**1/09/25/03**— सुरापोऽग्निस्पर्शां *(क्वथितां)* सुरां पिबेत् ३

**1/09/26/05**— स्त्रीणां चैवम् ५

## वाग्दोषे④

**1/09/26/03**— अनाक्रोश्यमाक्रुश्यानृतं वोक्त्वा त्रिरात्रमक्षीराक्षारालवणभोजनं ३

**1/09/26/04**— शूद्रस्य सप्तरात्रमभोजनम् ४

**1/09/26/05**— स्त्रीणां चैवम् ५

**2/10/27/14**— जिह्वाच्छेदनं शूद्र स्यार्यं धार्मिकमाक्रोशतः १४

## मिथ्याधीतौ④

**1/09/26/10**— मिथ्याऽधीत-प्रायश्चित्तम् १०

**1/09/26/11**— संवत्सरम् आचार्य-हिते वर्तमानो
वाचं यच्छेत्
स्वाध्याय एवोत्सृजमानो वाचम्
आचार्य आचार्य-दारे भिक्षाचर्ये च ११

**1/10/29/15**— अभीचारानुव्याहारावशुचिकरावपतनीयौ १५

**1/10/29/16**— पतनीयाविति हारीतः १६

## अपपात्र-संसर्गे④

**2/01/02/08**— यथा चाण्डालोपस्पर्शने संभाषायां दर्शने च दोषस्तत्र प्रायश्चित्तम् ८

**2/01/02/09**— अवगाहनमपामुपस्पर्शने संभाषायां ब्राह्मणसंभाषा दर्शने ज्योतिषां दर्शनम् ९

### शूद्रसेवा⑤

**1/09/27/11**— यद् एकरात्रेण करोति पापं
कृष्णं*(→शूद्रं)* वर्णं ब्राह्मणः सेवमानः ।
चतुर्थ-काल उदकाभ्यवायी *(स्नानकर्ता)*
त्रिभिर् वर्षैस् तद् अपहन्ति पापम् ११

## अन्यदोषेषु④

**1/09/26/07**— अनार्यव-पैशुन-प्रतिषिद्धाऽचारेष्व्
अभक्ष्याऽभोज्याऽपेय-प्राशने
शूद्रायां च रेतः सिक्त्वा ऽयोनौ च
दोषवच् च कर्माभिसंधिपूर्वं कृत्वा ऽनभिसंधिपूर्वं वा
ऽब्लिङ्गाभिर् अप उपस्पृशेद्
वारुणीभिर् वान्यैर् वा पवित्रैर् यथा कर्माभ्यासः ७

**1/09/26/12**— एवमन्येष्व् अपि दोषवत्स्व् अपतनीयेषूत्तराणि यानि वक्ष्यामः १२

**1/09/26/13**— काम-मन्युभ्यां वा जुहुयात् -
कामोऽकार्षीन् मन्युर् अकार्षीद् इति जपेद् वा १३

**1/09/26/14**— पर्वणि वा तिलभक्ष उपोष्य वा श्वोभूत उदकम् उपस्पृश्य सावित्रीं प्राणायामशः सहस्र-कृत्व आवर्तयेद् अप्राणायामशो वा १४

**1/09/27/01**— श्रावण्यां पौर्णमास्यां तिल-भक्ष उपोष्य वा
श्वोभूते महानदम् उदकम् उपस्पृश्य
सावित्र्या समित्-सहस्रम् आदध्याज् जपेद् वा १

**1/09/27/02**— इष्टि-यज्ञ-क्रतून् वा पवित्रार्थान् आहरेत् २

**1/09/27/09**— अथाऽपरम् ।
बहून्य् अप्य् अपतनीयानि कृत्वा
त्रिभिर् अनश्नत्-पारायणैः कृत-प्रायश्चित्तो भवति ९

**1/10/29/17**— पतनीयवृत्तिस्त्वशुचिकराणां द्वादश मासान्द्वादशार्धमासान्द्वादश द्वादशाहान्द्वादश सप्ताहान्द्वादश त्र्यहान्द्वादशाहं सप्ताहं त्र्यहमेकाहम् १७

**1/10/29/18**— इत्यशुचिकरनिर्वेषो यथा कर्माभ्यासः १८

**2/05/12/15**— आतमितोः प्राणमायच्छेदित्येके *(तावद् वा प्राणान् आयमयेद् यावद् अङ्गग्लानिर् न स्यात्)*१५

**2/05/12/18**— नियमातिक्रमे चान्यस्मिन् १८

**2/05/12/22**— अभिनिम्रुक्ताभ्युदित*(=सन्ध्याशायिनौ)*-कुनखि-श्यावदा-ऽग्रदिधिषु*(=कनिष्ठाया वोढा)*--दिधिषू-पति*(अग्रदिधिषौ ज्येष्ठायाः पश्चाद् वोढा)*-पर्याहित-परीष्ट-परिवित्त*(=अकृतविवाहः कनिष्ठे कृतविवाहे)*-परिविन्न*(=कनिष्ठे भागग्राहिणि ज्येष्ठः)*-परिविविदानेषु *(=परिविन्न-भ्राता)* चोत्तरोत्तरस्मिन्न् अशुचिकर-निर्वेषो गरीयान् गरीयान् २२

**2/05/12/23**— तच्च लिङ्गं *(=कुनखित्वादिकम्)* चरित्वोद्धार्यमित्येके २३

## अभोज्यभक्षणे④

**1/09/27/03**— अभोज्यं भुक्त्वा नैष्पुरीष्यम् *(कदेति चेत् -)*३

**1/09/27/04**— तत्-सप्त-रात्रेणावाप्यते ४

**1/09/27/05**— हेमन्त-शिशिरयोर् वोभयोः संध्योर् उदकम् उपस्पृशेत् ५

**1/09/27/06**— कृच्छ्र-द्वादश-रात्रं वा चरेत् ६

**1/09/27/07**— त्र्यहम् अनक्ताश्य्
अदिवाशी ततस् त्र्यहं
त्र्य्-अहम् अयाचित-व्रतस्
त्र्यहं नाश्नाति किंचनेति
कृच्छ्र-द्वादश-रात्रस्य विधिः ७

**1/09/27/08**— एतम् एवाभ्यसेत् संवत्सरं - स कृच्छ्रसंवत्सरः ८

## यभनमूलेषु④

### दाम्पत्य-व्यतिक्रमः⑤

**1/10/28/19**— दारव्यतिक्रमी खराजिनं बहिर्लोम परिधाय दारव्यतिक्रमिणे भिक्षामिति सप्तागाराणि चरेत् । सा वृत्तिः षण्मासान् १९

**1/10/28/20**— स्त्रियास्तु भर्तृव्यतिक्रमे कृच्छ्रद्वादशरात्राभ्यासस्तावन्तं कालम् २०

**2/10/27/05**— अविशिष्टं हि परत्वं पाणेः ५

**2/10/27/06**— तद्व्यतिक्रमे खलु पुनरुभयोर्नरकः ६

## अवकीर्णी ब्रह्मचारी⑤

**1/09/26/08**— गर्दभेनावकीर्णी निर्ऋतिं पाकयज्ञेन यजेत ८

**1/09/26/09**— तस्य शूद्रः प्राश्नीयात् ९

## अनार्यागमनम् / अनार्यगमनम्⑤

**1/09/26/07**— अनार्यव-पैशुन-प्रतिषिद्धाऽचारेष्व्
अभक्ष्याऽभोज्याऽपेय-प्राशने
शूद्रायां च रेतः सिक्त्वा ऽयोनौ च
दोषवच् च कर्माभिसंधिपूर्वं कृत्वा ऽनभिसंधिपूर्वं वा
ऽब्लिङ्गाभिर् अप उपस्पृशेद्
वारुणीभिर् वान्यैर् वा पवित्रैर् यथा कर्माभ्यासः ७

**1/09/27/10**— अनार्यां शयने बिभ्रेद्,
ददद् वृद्धिं*(=interest) (स्वद्रव्यस्य)*, कषाय-पः*(=सुराव्यतिरिक्तं मद्यं पिबन्)* ।
अब्राह्मण इव *(सर्वान्)* वन्दित्वा,
तृणेष्व् आसीत पृष्ठ-तप् १०

**2/10/27/08**— नाश्य आर्यः शूद्रायाम् ८

**2/10/27/09**— वध्यः शूद्र आर्यायाम् ९

**2/10/27/10**— दारं चास्य कर्शयेत् १०

## परदारा-गमनम्, कुमारी-गमनम्⑤

**1/10/28/01**— यथा कथा च परपरिग्रहम् अभिमन्यते - स्तेनो ह भवतीति कौत्स-हारीतौ, तथा कण्व-पुष्करसादी १

**1/10/28/02**— सन्त्य् अपवादाः परिग्रहेष्व् इति वार्ष्यायणिः २

**2/10/26/18**— अबुद्धिपूर्वमलंकृतो युवा परदारमनुप्रविशन्कुमारीं वा वाचा बाध्यः १८

**2/10/26/19**— बुद्धिपूर्वं तु दुष्टभावो दण्ड्यः १९

**2/10/26/20**— संनिपाते वृत्ते शिश्नच्छेदनं सवृषणस्य २०

**2/10/26/21**— कुमार्यां तु स्वान्यादाय नाश्यः २१

**2/10/26/22**— अथ *(परदार-कुमार्यौ)* भृत्ये राज्ञा २२

**2/10/26/23**— रक्ष्ये चात ऊर्ध्वं मैथुनात् २३

**2/10/26/24**— निर्वेषाभ्युपाये तु स्वामिभ्योऽवसृजेत् २४

**2/10/27/01**— चरिते यथापुरं, *(यतः)* धर्माद्धि संबन्धः १

**2/10/27/11**— सवर्णायामन्यपूर्वायां सकृत्संनिपाते पादः पततीत्युपदिशन्ति *(अतः पतितप्रायश्चित्तस्य पादस् तस्मै)* ११

**2/10/27/12**— एवमभ्यासे पादः पादः १२

**2/10/27/13**— चतुर्थे सर्वम् १३

### गुरुतल्पगमनम्⑤

**1/10/28/15**— गुरुतल्पगामी तु सुषिरां सूर्मिं प्रविश्योभयत आदीप्याभिदहेदात्मानम् १५

**1/10/28/16**— मिथ्यैतदिति हारीतः १६

**1/09/25/01**— गुरुतल्पगामी सवृषणं शिश्नं परिवास्याञ्जलावाधाय दक्षिणां दिशमनावृत्तिं व्रजेत् १

**1/09/25/02**— ज्वलितां वा सूर्मिं परिष्वज्य समाप्नुयात् २

**1/09/26/05**— स्त्रीणां चैवम् ५

## हत्यायाम्④

**1/10/29/06**— परीक्षार्थोऽपि ब्राह्मण आयुधं माददीत ६

**1/10/29/07**— यो हिंसार्थमभिक्रान्तं हन्ति मन्युरेव मन्युं स्पृशति न तस्मिन्दोष इति पुराणे ७

### ब्रह्महत्या-पैशुनयोः⑤

**1/09/24/06**— पूर्वयोर्वर्णयोर्वेदाध्यायं हत्वा सवनगतं वाभिशस्तः ६

**1/09/24/07**— ब्राह्मणमात्रं च ७

**1/09/24/08**— गर्भं च तस्याविज्ञातम् ८

**1/09/24/09**— आत्रेयीं *(=ऋतुस्नाताम्)* च स्त्रियम् ९

**1/09/24/23**— धर्मार्थसंनिपातेऽर्थग्राहिण एतदेव २३

**1/09/24/10**— तस्य निर्वेषः *(=प्रायश्चित्तम्)* १०

**1/09/24/11**— अरण्ये कुटिं कृत्वा वाग्यतः शवशिरध्वजोऽर्धशाणीपक्षमधोनाभ्युपरिजान्वाच्छाद्य ११

**1/09/24/12**— तस्य पन्था अन्तरा वर्त्मनी १२

**1/09/24/13**— दृष्ट्वा चान्यमुत्क्रामेत् १३

**1/09/24/14**— खण्डेन लोहितकेन शरावेण ग्रामे प्रतिष्ठेत १४

**1/09/24/15**— कोऽभिशस्ताय भिक्षामिति सप्तागाराणि चरेत् १५

**1/09/24/16**— सा वृत्तिः १६

**1/09/24/17**— अलब्धोपवासः १७

**1/09/24/18**— गाश्च रक्षेत् १८

**1/09/24/19**— तासां निष्क्रमणप्रवेशने द्वितीयो ग्रामेऽर्थः १९

**1/09/24/20**— द्वादश वर्षाणि चरित्वा सिद्धः सद्भिः संप्रयोगः २०

**1/09/24/21**— आजिपथे वा कुटिङ्कृत्वा ब्राह्मणगव्योपजिगीषंआणो वसेत्त्रिः प्रतिराद्धोऽपजित्य वा मुक्तः २१

**1/09/24/22**— आश्वमेधिकं वावभृथमवेत्य मुच्यते २२

अब्राह्मणश्चेद् हन्ता -

**1/09/25/11**— प्रथमं वर्णं परिहाप्य प्रथमं वर्णं हत्वा संग्रामं गत्वावतिष्ठेत । तत्रैनं हन्युः ११

**1/09/25/12**— अपि वा लोमानि त्वचं मांसमिति हावयित्वाग्निं प्रविशेत् १२

**1/09/26/06**— येष्वाभिशस्त्यं तेषामेकाङ्गं छित्त्वाप्राणहिंसायाम् *(ततः शूद्रहप्रायश्चित्तम्)* ६

श्रोत्रिय-हत्या, गुरुहत्या-

**1/09/24/24**— गुरुं हत्वा श्रोत्रियं वा कर्मसमाप्तमेतेनैव विधिनोत्तमादुच्छवासाच्चरेत् २४

**1/09/24/25**— नास्यास्मिंल्लोके प्रत्यापत्तिर्विद्यते कल्मषं तु निर्हण्यते २५

**1/09/26/05**— स्त्रीणां चैवम् ५

### अन्य-हत्यायाम्⑤

**1/10/28/17**— यो ह्यात्मानं परं वाभिमन्यते *(=हन्ति)* ऽभिशस्त एव स भवति १७

**1/10/28/18**— एतेनैव विधिनोत्तमादुच्छ्वासाच्चरेत् । नास्यास्मिंल् लोके प्रत्यापत्तिर्विद्यते । कल्मषं तु निर्हण्यते १८

### भ्रूणहा⑤

**1/10/28/21**— अथ भ्रूणहा श्वाजिनं खराजिनं वा बहिर्लोम परिधाय पुरुषशिरः प्रतीपानार्थमादाय २१

**1/10/29/01**— खट्वाङ्गं दण्डार्थे कर्मनामधेयं प्रब्रुवाणश्चङ्क्रम्येत को भ्रूणघ्ने भिक्षामिति । ग्रामे प्राणवृत्तिं प्रतिलभ्य शून्यागारं वृक्षमूलं वाभ्युपाश्रयेन्न हि म आर्यैः संप्रयोगो विद्यते १-१

एतेनैव विधिनोत्तमादुच्छ्वासाच्चरेत् । नास्यास्मिंल् लोके प्रत्यापत्तिर्विद्यते । कल्मषं तु निर्हण्यते १-२

**1/10/29/01**— खट्वाङ्गं दण्डार्थे कर्मनामधेयं प्रब्रुवाणश्चङ्क्रम्येत को भ्रूणघ्ने भिक्षामिति । ग्रामे प्राणवृत्तिं प्रतिलभ्य शून्यागारं वृक्षमूलं वाभ्युपाश्रयेन्न हि म आर्यैः संप्रयोगो विद्यते १-१

एतेनैव विधिनोत्तमादुच्छ्वासाच्चरेत् । नास्यास्मिंल् लोके प्रत्यापत्तिर्विद्यते । कल्मषं तु निर्हण्यते १-२

### जनवधे⑤

**1/09/24/01**— क्षत्रियं हत्वा गवां सहस्रं वैरयातनार्थं दद्यात् १

**1/09/24/02**— शतं वैश्ये २

**1/09/24/03**— दश शूद्रे ३

**1/09/24/04**— ऋषभश्चात्राधिकः सर्वत्र प्रायश्चित्तार्थः ४

**1/09/24/05**— स्त्रीषु चैतेषामेवम् ५

**1/09/26/05**— स्त्रीणां चैवम् ५

… *(शूद्रः)*
**2/10/27/16**— पुरुषवधे स्तेये भूम्यादान इति स्वान्यादाय वध्यः १६

**2/10/27/17**— चक्षुनिरोधस्त्वेतेषु ब्राह्मणस्य १७

### प्राणिहत्यायाम्⑤

**1/09/25/13**— वायसप्रचलाकबर्हिणचक्रवाकहंसभासमण्डूकनकुलडेरिकाश्वहिंसायां शूद्र वत्प्रायश्चित्तम् १३

**1/09/26/01**— धेन्वनडुहोश्चाकारणात् १

**1/09/26/02**— धुर्यवाहप्रवृत्तौ चेतरेषां प्राणिनाम् २

**1/09/26/05**— स्त्रीणां चैवम् ५

## प्रयतता③

## आवश्यकता④

**1/04/14/19**— तथाप्रयताय १९

**1/04/14/20**— अप्रयतश्च न प्रत्यभिवदेत् २०

**1/05/15/08**— शक्तिविषये न मुहूर्तमप्यप्रयतः स्यात् ८

**1/05/15/09**— नग्नो वा ९

प्रयतता-प्राप्तिः-

**1/05/15/02**— भूमिगतास्वप्स्वाचम्य प्रयतो भवति २

**1/05/15/03**— यं वा प्रयत आचामयेत् ३

## उचिता आपः④

**1/05/15/04**— न वर्षधारास्वाचामेत् ४

**1/05/15/05**— तथा प्रदरोदके *(स्वयंभुवि गर्ते)* ५

**1/05/15/06**— तप्ताभिश्चाकारणात् ६

## शरीरस्थितिः④

**1/05/15/10**— नाप्सु सतः प्रयमणम्विद्यते १०

**1/05/15/11**— उत्तीर्य त्वाचामेत् ११

**1/05/16/01**— तिष्ठन्न+आचामेत्प्रह्वो वा १

## विधिः④

**1/05/16/02**— आसीनस्त्रिराचामेद्धृदयङ्गमाभिरद्भिः २

**1/05/16/03**— त्रिरोष्ठौ परिमृजेत् ३

**1/05/16/04**— द्विरित्येके ४

**1/05/16/05**— सकृदुपस्पृशेत् ५

**1/05/16/06**— द्विरित्येके ६

**1/05/16/07**— दक्षिणेन पाणिना सव्यं प्रोक्ष्य, पादौ शिरश्चेन्द्रियाण्युपस्पृशेच् चक्षुषी नासिके श्रोत्रे च ७

**1/05/16/08**— अथाप उपस्पृशेत् ८

**1/05/16/09**— भोक्ष्यमाणस्तु प्रयतोऽपि द्विराचामेद्द्विः परिमृजेत्सकृदुपस्पृशेत् ९

"अशौचम्, अप्रयतता, चौक्षता" इति विषयेष्व् अन्यत्र

## स्नानम्②

**1/11/32/07**— *(नित्य-स्नाने स्नातकोचिते)* सशिरा वमज्जनम् अप्सु वर्जयेत् ७

**1/11/32/08**— अस्तम् इते च स्नानम् *(वर्जयेत्)*८

**2/09/22/13**— शनैर् अपोऽभ्यवेयाद्
अभिघ्नन्न्
अभिमुखम् आदित्यम्
उदकम् उपस्पृशेत् *(=स्नायात्)* १३

**2/09/22/14**— इति सर्वत्रोदकोपस्पर्शन-विधिः १४

## वाणिज्यम्②

## वाणिज्य-वस्तुषु नियमाः③

**1/07/20/12**— ... मनुष्यान्,
रसान्, रागान्, गन्धान्,
अन्नं,
चर्म, गवां वशां*(=वन्ध्य-गाम्)*
श्लेष्म*(=glue)*+उदके,
तोक्म*(=अङ्कुराणि)*-किण्वे*(=सुरादि)*
पिप्पलि*(=रक्त-मरीच)*-मरीचे
धान्यं, मांसम्,
आयुधं, सुकृताशां च १२*(5)*

**1/07/20/13**— तिल-तण्डुलांस् त्व् एव धान्यस्य
विशेषेण न विक्रीणीयात् १३

**1/07/20/14**— अविहितश् चैतेषां मिथो विनिमयः १४

**1/07/20/15**— अन्नेन चान्नस्य,
मनुष्याणां च मनुष्यैः,
रसानां च रसैर्,
गन्धानां च गन्धैर्,
विद्यया च विद्यानाम् १५

**1/07/20/16**— अ-क्रीतपण्यैर् व्यवहरेत १६

**1/07/21/01**— मुञ्जबल्बजैर्मूलफलैः १

**1/07/21/02**— तृणकाष्ठैरविकृतैः २

**2/06/13/10**— दानं क्रयधर्मश्चापत्यस्य न विद्यते १०

**2/06/13/11**— विवाहे दुहितृमते दानं काम्यं धर्मार्थं श्रूयते तस्माद्दुहितृमतेऽधिरथं शतं देयं तन्मिथुया कुर्यादिति ११-१

तस्यां क्रयशब्दः संस्तुतिमात्रम् । धर्माद्धि संबन्धः ११-२

**2/06/13/12**— एकधनेन ज्येष्ठं तोषयित्वा १२

## कैस् सह वाणिज्यम्?③

**1/07/21/05**— न पतितैः संव्यवहारो विद्यते ५

**1/07/21/06**— तथापपात्रैः ६

**1/11/32/18**— क्षुद्रान्, क्षुद्राचरितांश् च देशान् न सेवेत १८

## कीनाशः, पशुपः③

**2/11/28/01**— क्षेत्रं परिगृह्योत्थानाभावात्फलाभावे यः समृद्धः स भावि तदपहार्यः १

**2/11/28/02**— अवशिनः कीनाशस्य कर्मन्यासे दण्डताडनम् २

**2/11/28/03**— तथा पशुपस्य ३

**2/11/28/04**— अवरोधनं चास्य पशूनाम् ४

## पशु-दण्डनम्③

**2/11/28/05**— हित्वा व्रजमादिनः कर्शयेत्पशून्। नातिपातयेत्। ५

**2/11/28/06**— अवरुध्य पशून्मारणे नाशने वा स्वामिभ्योऽवसृजेत् ६

## उञ्छवृत्तिः③

**1/10/28/03**— शम्योषा युग्यघासो न स्वामिनः प्रतिषेधयन्ति ३

**1/10/28/04**— अतिव्यपहारो व्यृद्धो भवति ४

**1/10/28/05**— सर्वत्रानुमतिपूर्वमिति हारीतः ५

## वासः②

**1/05/15/22**— प्रभूतैधोदके ग्रामे यत्रात्माधीनं प्रयमणं तत्र वासो धार्म्यो ब्राह्मणस्य २२

**1/11/32/18**— क्षुद्रान्, क्षुद्राचरितांश् च देशान् न सेवेत १८

## वाक्-नियमनम्②

## पावित्र्ये③

**1/11/31/04**— देवताभिधानं चाप्रयतः ४

*(अपपात्रसम्भाषणे प्रायश्चित्तम् अन्यत्रोक्तम्)*

## परुष-वचने③

**1/11/31/05**— परुषं *(वचनं)* चोभयोर् देवतानां राज्ञश् च *(वर्जयेत्)* ५

**1/11/31/08**— गोर्, दक्षिणानां, कुमार्याश् च परीवादान् वर्जयेत् ८

**1/11/31/15**— न "+असौ मे सपत्न" ब्रूयात् । यद्यसौ मे सपत्न इति ब्रूयाद्, द्विषन्तं भ्रातृव्यं जनयेत् १५

## वचन-शैल्याम्③

**1/11/31/09**— *(सस्यधान्यादिकं भक्षयन्तीं←)* स्पृहतीं च गां नाचक्षीत *(तत्स्वामिने)* ९

**1/11/31/10**— संसृष्टां *(गां)* च वत्सेनानिमित्ते *(नाचक्षीत तत्स्वामिने)*१०

**1/11/31/11**— नाधेनुम् अधेनुर् इति ब्रूयात् - "धेनुभव्ये"त्य् एव ब्रूयात् ११

**1/11/31/12**— न भद्रम् "भद्रम्" इति ब्रूयात् । *(तत्-स्थाने)* "पुण्यं प्रशास्तम्" इत्येव ब्रूयात् १२

**1/11/31/16**— नेन्द्र-धनुर् इति परस्मै प्रब्रूयात् १६

**1/11/31/17**— न पततः *(=पक्षिणः/ asteroids)* संचक्षीतः*(=गणयेत्)* १७

## प्रशंसायाम्③

**1/11/32/10**— स्तुतिं च गुरोः समक्षं - यथा "सुस्नातम्" इति १०

## साक्षिवचने③

**1/11/32/22**— *(दुर्बोध्यार्थ-)*प्रश्नं*(→प्रश्नोत्तरं)* च न विब्रूयात् २२

**1/11/32/23**— अथाप्य् उदाहरन्ति *(वक्ष्यमाणं श्लोकम्)* २३

**1/11/32/24**—

> मूलं तूलं*(→आगामिनी सम्पत्)* वृहति*(=उत्पाटयति)*
> दुर्विवक्तुः प्रजां पशून् आयतनं हिनस्ति ।
> "धर्मप्रह्लाद! न कुमालनाय *(इदं कुकर्म)*"
> रुदन् ह मृत्युर् व्य्-उवाच *(ऋषिकृतं)* प्रश्नम्
> *("केनानवधानेन पातितेन मच्छिशुर् मृत" इति )*

इति २४

**2/05/12/21**— न संशये प्रत्यक्षवद्ब्रूयात् २१

## वादेषु③

**1/07/20/05**— अन्-असूयुर्, दुष्-प्रलम्भः स्यात्
कुहक-शठ-नास्तिक-बाल-वादेषु ५

*(सभानियमा अन्यत्रोक्ताः।)*

## सभाः③

**1/11/32/19**— सभाः समाजांश्*(=जनयूथं)* च १९

**1/11/32/20**— समाजं*(=जनयूथं)* चेद् गच्छेत्, *(निर्गच्छन्)* प्रदक्षिणी-कृत्यापेयात् २०

## वस्त्राणि②

## द्रव्यम्③

**1/05/15/08**— शक्तिविषये न मुहूर्तमप्यप्रयतः स्यात् ८

**1/05/15/09**— नग्नो वा ९

**1/11/32/09**— पालाशम् {आसनं, पादुके, दन्त-प्रक्षालनम्} इति च वर्जयेत् ९

**2/02/04/21**— *(गृहस्थेन)* नित्यमुत्तरं वासः कार्यम् २१

**2/02/04/22**— अपि वा सूत्रमेवोपवीतार्थे २२

# यज्ञोपवीतम्③

**1/05/15/01**— उपासने गुरूणां वृद्धानामतिथीनां होमे जप्यकर्मणि भोजन आचमने स्वाध्याये च यज्ञोपवीती स्यात् १

# विधिः③

**1/05/15/15**— प्रोक्ष्य वास उपयोजयेत् १५

# विवादः②

# निर्णेतारः③

**2/11/29/05**— विवादे विद्याभिजनसंपन्ना वृद्धा मेधाविनो धर्मेष्वविनिपातिनः ५

# साक्षि-वचनम्③

**2/11/29/07**— पुण्याहे प्रातरग्नाविद्धे ऽपामन्ते राजवत्य् उभयतः *(उभयपक्षाभ्याम्)* समाख्याप्य सर्वानुमते मुख्यः सत्यं प्रश्नं ब्रूयात् ७

**2/11/29/08**— अनृते राजा दण्डं प्रणयेत् ८

**2/11/29/09**— नरकश्चात्राधिकः सांपराये ९

**2/11/29/10**— सत्ये स्वर्गः सर्वभूतप्रशंसा च १०

*(साक्षिवचने वाङ्-नियमनम् अन्यत्र प्रशस्तम्।)*

# निर्णय-विधानम्③

**2/11/29/06**— संदेहे लिङ्गतो *(=अनुमानेन)* दैवेनेति विचित्य ६

## युद्धम्②

**2/05/10/10—** अयाज्योऽनधीयानः ९

**2/05/10/11—** युद्धे तद्योगा यथोपायमुपदिशन्ति तथा प्रतिपत्तव्यम् १०

# +पात्राणि①

## आचार्यः②

**1/01/01/11**— तमसो वा एष *(आगत्य)* तमः प्रविशति - यम् अविद्वान् उपनयते, यश् चाविद्वान् - इति हि ब्राह्मणम् ११

**1/01/01/12**— तस्मिन्न् अभिजन-विद्यासमुदेतं समाहितं संस्कर्तारम् ईप्सेत् १२

**1/01/01/13**— तस्मिंश् चैव विद्या-कर्म +आन्तम् अविप्रतिपन्ने धर्मेभ्यः १३

**1/01/01/14**— यस्माद् धर्मान् आचिनोति स **आचार्यः** १४ *(5)*

**1/01/01/15**— तस्मै न द्रुह्येत् कदाचन १५

**1/01/01/16**— स हि विद्यातस् तं जनयति १६

**1/01/01/17**— तच् +छ्रेष्ठं जन्म १७

**1/01/01/18**— शरीरम् एव माता-पितरौ जनयतः १८

## वर्णः③

**2/02/04/24**— ब्राह्मण आचार्यः स्मर्यते तु २४

**2/02/04/25**— आपदि ब्राह्मणेन राजन्ये वैश्ये वाध्ययनम् २५

**2/02/04/26**— अनुगमनं च पश्चात् २६

**2/02/04/27**— तत ऊर्ध्वं ब्राह्मण एवाग्रे गतौ स्यात् २७

## परीक्षा③

**2/03/06/01**— जात्याचारसंशये धर्मार्थमागतमग्निमुपसमाधाय जातिमाचारं च पृच्छेत् १

**2/03/06/02**— साधुतां चेत्प्रतिजानीतेऽग्निरुपद्र ष्टा वायुरुपश्रोतादित्योऽनुख्याता साधुतां प्रतिजानीते साध्वस्मा अस्तु वितथ एष एनस इत्युक्त्वा शास्तुं प्रतिपद्येत २

**1/02/08/24**— तस्मिन्गुरोर्वृत्तिः २३

**1/02/08/25**— पुत्रमिवैनमनुकाङ्क्षन्सर्वधर्मेष्वनपच्छादयमानः सुयुक्तो विद्यां ग्राहयेत् २४

**1/02/08/27**— अन्तेवास्यनन्तेवासी भवति विनिहितात्मा गुरावनैपुणमापद्यमानः २६

**1/02/08/28**— आचार्योऽप्यनाचार्यो भवति श्रुतात्परिहरमाणः २७

**1/02/08/29**— अपराधेषु चैनं सततमुपालभेत २८

**1/02/08/30**— अभित्रास उपवास उदकोपस्पर्शनमदर्शनमिति दण्डा यथामात्रमा निवृत्तेः २९

**1/04/14/03**— अध्ययनार्थेन यं चोदयेन्न चैनं प्रत्याचक्षीत ३

**1/04/14/04**— न चास्मिन्दोषं पश्येत् ४

**1/04/14/05**— यदृच्छायामसंवृत्तौ गतिरेव तस्मिन् ५

**2/02/05/16**— उपाकरणादोत्सर्जनादध्यापयितुर्नियमः। लोमसंहरणं मांसं श्राद्धं मैथुनमिति च वर्जयेत् १६

**2/02/05/17**— ऋत्वे वा जायाम् १७

**2/02/05/18**— यथागमं शिष्येभ्यो विद्यासंप्रदाने नियमेषु च युक्तः स्यात् । एवं वर्तमानः पूर्वापरान्संबन्धानात्मानं च क्षेमे युनक्ति १८

## समावर्तने③

**1/02/08/31**— निवृत्तं चरितब्रह्मचर्यमन्येभ्यो धर्मेभ्योऽनन्तरो भवेत्यतिसृजेत् ३०

**1/04/13/05**— न समावृत्ते समादेशो विद्यते ५

**1/02/07/26**— शास्तुश्चानागमाद्वृत्तिरन्यत्र २६

... "गुरौ गौरव-दर्शनम्" इत्यत्र शिष्टम्

## व्रतविशेषः③

**1/11/32/01**— प्रवचन-युक्तो वर्षा-शरदं मैथुनं वर्जयेत् १

**1/11/32/03**— शयानश् चाध्यापनं वर्जयेत् ३

**1/11/32/04**— न च तस्यां शय्यायाम् अध्यापयेद् यस्यां शयीत ४

**1/11/32/05**— अन्-आविः*(भूत)*-स्रग्-अनुलेपणः स्यात् ५

## +आश्रमः②

## ब्रह्मचर्यम्③

## गुरुकुले वासः, ब्रह्मचर्य-कालः④

**1/01/02/11**— उपेतस्याचार्यकुले ब्रह्मचारिवासः ११

**1/01/02/12**— अष्टाचत्वारिंशद्वर्षाणि १२

**1/01/02/13**— पादूनम् १३

**1/01/02/14**— अर्धेन १४

**1/01/02/15**— त्रिभिर्वा १५

**1/01/02/16**— द्वादशावरार्ध्यम् १६

**1/01/02/17**— न ब्रह्मचारिणो विद्यार्थस्य परोपवासोऽस्ति १७

**1/01/02/18**— अथ ब्रह्मचर्यविधिः १८

## वेषः④

### मेखला⑤

**1/01/02/33**—

- मौञ्जी मेखला त्रिवृद् ब्राह्मणस्य, शक्तिविषये दक्षिणावृत्तानाम् ३३

**1/01/02/34**— ज्या राजन्यस्य ३४

**1/01/02/35**— मौञ्जी वायोमिश्रा ३५

**1/01/02/37**— सैरी तामली वेत्येके ३७

### दण्डः⑤

**1/01/02/38**— पालाशो दण्डो ब्राह्मणस्य,
नैय्यग्रोध-स्कन्धजो ऽवाङ्ग्रो राजन्यस्य,
बादर औदुम्बरो वा वैश्यस्य।
*(यज्ञियो)* वार्क्षो दण्ड इत्य् अवर्ण-संयोगेनैक उपदिशन्ति ३८

### कौपीनम्/ वेष्टिः⑤

**1/01/02/39**—

- वासः ३९

**1/01/02/40**— शाणी*(=hemp)*-क्षौमा*(=linen/ flax)*ऽजिनानि *(ब्राह्मण-क्षत्रिय-वैश्यानाम्)*४०

**1/01/02/41**— कषायं*(=red Lodh/ kaavi)* चैके *(कार्पासं)* वस्त्रम् उपदिशन्ति ४१

## उत्तरीयम्, कम्बलः④

**1/01/03/01**— माञ्जिष्ठं*(=madder-red-dyed)* राजन्यस्य १

**1/01/03/02**— हारिद्रं वैश्यस्य। *(तेन कार्पासे धृते वर्णविकल्पो नास्ति।)* २

**1/01/03/03**— हारिणम्*(=मृगजम्)*, ऐणेयं*(=मृगीजम्)* वा *(blackbuck-जात्या, न वर्णेन)* कृष्णं ब्राह्मणस्य *(अजिनम्, न श्वैतैणेयम्)* ३

**1/01/03/04**— *(ऐणेयं)* कृष्णं चेद् अनुपस्तीर्णासन-शायी स्यात् ४

**1/01/03/05**— रौरवं*(→ रौतीति - barasingha? Chital?)* राजन्यस्य ५

**1/01/03/06**— बस्ताजिनं वैश्यस्य ॥ ६ ॥

**1/01/03/07**— आविकं सार्ववर्णिकम् ॥ ७ ॥

**1/01/03/08**— कम्बलश् च *(आविकः)* ॥८॥

**1/01/03/09**— ब्रह्मवृद्धिमिच्छन्न् अजिनान्य् एव वसीत,
क्षत्रवृद्धिम् इच्छन् वस्त्राण्य् एव,
उभय-वृद्धिम् इच्छन्न् उभयम् इति हि(१) ब्राह्मणम् ॥ ९॥

**1/01/03/10**— अजिनं त्वेवोत्तरं *(→उत्तरीयरूपेण)* धारयेत् *(इत्य् आपस्तम्बपक्षः)* १०

## ब्रह्मचर्ये नियमाः साधारणाः④

**1/02/05/01**— नियमेषु तपःशब्दः १

**1/02/05/02**— तद्-अतिक्रमे विद्या-कर्म निःस्रवति ब्रह्म सहापत्याद् एतस्मात् २

**1/02/05/03**— कर्तपत्यम् अनायुष्यं च ३

**1/02/05/04**— तस्माद् ऋषयो ऽवरेषु न जायन्ते नियमाति-क्रमात् ४

## अध्ययने④

**1/02/05/07**— यत्किं च समाहितो ऽब्रह्माप्य् आचार्याद् उपयुङ्क्ते ब्रह्मवद् एव तस्मिन् फलं भवति ७

**1/02/05/08**— अथो यत्किञ् च मनसा वाचा चक्षुषा वा सङ्कल्पन् ध्यायत्य् आहाभिविपश्यति वा तथैव तद्भवतीत्युपदिशन्ति ८

**1/02/05/09**— गुरुप्रसादनीयानि कर्माणि स्वस्त्ययनमध्ययनसंवृत्तिरिति ९

**1/02/05/10**— अतोऽन्यानि निवर्तन्ते ब्रह्मचारिणः कर्माणि १०

**1/02/05/11**— स्वाध्यायधृग् धर्मरुचिस्तपस्व्यृजुर्मृदुः सिध्यति ब्रह्मचारी ११

**1/02/05/23**— सर्वाह्णं सुयुक्तो ऽध्ययनाद् अनन्तरोऽध्याये २३

**1/02/05/24**— तथा गुरु-कर्मसु २४

**1/02/05/25**— मनसा चानध्याये २५

**1/02/05/26**— आहूताध्यायी च स्यात् २६

## विनोद-त्यागः④

**1/01/02/24**— अदिवास्वापी २४

**1/01/02/25**— अगन्धसेवी २५

**1/01/02/26**— मैथुनं न चरेत् २६

**1/01/02/27**— उत्सन्न-श्लाघः २७

**1/01/02/28**— अङ्गानि न प्रक्षालयीत २८

**1/01/02/29**— प्रक्षालयीत त्वशुचिलिप्तानि गुरोर् असन्दर्शे २९

**1/01/02/30**— नाप्सु श्लाघमानः स्नायाद् - यदि स्नायाद् दण्डवत् ३०

**1/01/02/31**— जटिलः ३१

**1/01/02/32**— शिखाजटो वा वापयेद् इतरान् ३२

**1/01/03/11**— अ-नृत्त-दर्शी ११

**1/01/03/12**— सभाः समाजांश् चागन्ता १२

**1/01/03/13**— अजन-वाद-शीलः १३

**1/01/03/14**— रहश्-शीलः १४

**1/01/03/15**— गुरोर् उदाचारेष्व् अकर्ता स्वैरि-कर्माणि १५

**1/01/03/16**— स्त्रीभिर् यावद्-अर्थ-संभाषी १६

**1/01/03/17**— मृदुः १७

**1/01/03/18**— शान्तः १८

**1/01/03/19**— दान्तः १९

**1/01/03/20**— ह्रीमान् २०

**1/01/03/21**— दृढधृतिः २१

**1/01/03/22**— अग्लांस्नुः २२

**1/01/03/23**— अक्रोधनः २३

**1/01/03/24**— अनसूयुः २४

**1/02/07/03**— न प्रेक्षेत नग्नां स्त्रियम् ३

**1/02/07/04**— ओषधि-वनस्पतीनाम् आच्छिद्य नोपजिघ्रेत् ४

**1/02/07/05**— उपानहौ छत्रं यानम् इति च वर्जयेत् ५

**1/02/07/06**— न स्मयेत ६

**1/02/07/08**— नोपजिघ्रेत् स्त्रियं मुखेन ८

**1/02/07/09**— न हृदयेन प्रार्थयेत् ९

**1/02/07/10**— नाकारणाद् उपस्पृशेत् १०

**1/02/07/11**— रजस्वलो रक्तदन् सत्यवादी स्याद् इति हि ब्राह्मणम् ११

## आचार्यप्रमादे④

**1/01/04/25**— प्रमादादाचार्यस्य बुद्धिपूर्वं वा नियमातिक्रमं रहसि बोधयेत् २५

**1/01/04/26**— अनिवृत्तौ स्वयं कर्माण्यारभेत २६

**1/01/04/27**— निवर्तयेद्वा २७

**1/01/04/29**— स य एवं प्रणिहितात्मा ब्रह्मचार्यत्रैवास्य सर्वाणि कर्माणि फलवन्त्यवाप्तानि भवन्ति यान्यपि गृहमेधे २९

*(आचार्ये पतिते व्यवहारो बहिष्कारपङ्क्तौ दृश्यताम्।)*

## शुश्रूषा④

**1/01/02/19**— आचार्याधीनः स्यादन्यत्र पतनीयेभ्यः १९

**1/01/02/20**— हितकारी गुरोरप्रतिलोमयन्वाचा २०

**1/01/02/21**— अधासनशायी २१

**1/02/05/23**— सर्वाह्णं सुयुक्तो ऽध्ययनाद् अनन्तरोऽध्याये २३

**1/02/05/24**— तथा गुरु-कर्मसु २४

**1/02/06/28**— चेष्टति च चिकीर्षन्तच्छक्तिविषये २८

**1/02/06/37**— आचामेद्वा ३७

**1/02/06/38**— किं करवाणीत्य् आमन्त्र्य ३८

**1/02/07/25**— प्रेषितस्तदेव प्रतिपद्येत २५

**1/04/13/10**— नासमयेन कृच्छ्रं कुर्वीत त्रिःश्रावणं त्रिःसहवचनमिति परिहाप्य १०

**1/04/13/11**— अविचिकित्सा यावद् ब्रह्म निगन्तव्यम् इति हारीतः ११ *(????)*

**1/04/13/12**— न बहिर्वेदे गतिर्विद्यते १२

**1/04/13/13**— समादिष्टमध्यापयन्तं यावदध्ययनमुपसंगृह्णीयात् १३

**1/04/13/14**— नित्यमर्हन्तमित्येके १४

**1/04/13/15**— न गतिर् *(=शुश्रूषा)* विद्यते १५

**1/04/13/16**— वृद्धानां तु १६

**1/04/13/17**— ब्रह्मणि मिथो विनियोगे न गतिर्विद्यते १७

**1/04/13/18**— ब्रह्म वर्धत इत्युपदिशन्ति १८

## निद्रा④

**1/02/06/01**— सदा निशायां गुरुं संवेशयेत्तस्य पादौ प्रक्षाल्य संवाह्य १

**1/02/06/02**— अनुज्ञातः संविशेत् २

**1/02/06/03**— न चैनमभिप्रसारयीत ३

**1/02/06/04**— न खट्वायां सतोऽभिप्रसारणमस्तीत्येके ४

**1/02/06/05**— न चास्य सकाशे संविष्टो भाषेत् ५

**1/02/06/06**— अभिभाषितस्त्वासीनः प्रतिब्रूयात् ६

**1/01/04/22**— स्वप्नं च वर्जयेत् २२

**1/01/04/23**— अथाहरहराचार्यं गोपायेद् धर्मार्थयुक्तैः कर्मभिः २३

**1/01/04/24**— स गुप्त्वा संविशन्ब्रूयाद्धर्मगोपायमाजूगुपमहमिति २४

**1/01/04/28**— अथ यः पूर्वोत्थायी जघन्यसंवेशी तमाहुर्न स्वपितीति २८

# समिदाधानम्④

**1/01/04/13**— सायं प्रातर् उदकुम्भम् आहरेत् १३

**1/01/04/14**— सदारण्याद् एधान् आहृत्याधो निदध्यात् १४

**1/01/04/15**— नास्तम् इते समिद्धारो गच्छेत् १५

**1/01/04/16**— अग्निम् **इद्ध्वा**
परिसमूह्य *(मार्जयित्वा)*
समिध **आदध्यात्**
सायं प्रातर् यथोपदेशम् १६

**1/01/04/17**— सायम् एवाग्नि-पूजेत्य् एके १७

**1/01/04/18**— समिद्धम् अग्निं
पाणिना परिसमूहेन् - न समूहन्या १८

**1/01/04/19**— प्राक् तु याथाकामी १९

**1/01/04/20**— नाग्न्य्-उदक-शेषेण वृथा-कर्माणि कुर्वीताऽऽचामेद् वा २०

**1/01/04/21**— पाणि-संक्षुब्धेनोदकेनैक-पाण्याऽऽवर्जितेन च नाचामेत् २१

# भोजनम्④

## भोजनात् परम्⑤

**1/01/03/36**— भुक्त्वा स्वयम् अमत्रं प्रक्षालयीत ३६

**1/01/03/37**— न चोच्छिष्टं कुर्यात् ३७

**1/01/03/38**— अशक्तौ भूमौ निखनेत् ३८

**1/01/03/39**— अप्सु वा प्रवेशयेत् ३९

**1/01/03/40**— आर्याय वा पर्यवदध्यात् ४०

**1/01/03/41**— अन्तर्धिने वा शूद्रा य ४१

**1/02/06/36**— भुक्त्वाचार्यस्य सकाशे नानूत्थायोच्छिष्टं प्रयच्छेत् ३६

**1/02/06/37**— आचामेद्वा ३७

**1/02/06/38**— किं करवाणीत्य् आमन्त्र्य ३८

**1/02/07/01**— उत्तिष्ठेत् तूष्णीं वा १

## भोजनात् प्राक्⑤

**1/01/03/42**— प्रोषितो भैक्षाद् अग्नौ कृत्वा भुञ्जीत ४२

**1/01/03/43**— भैक्षं हविषा संस्तुतं तत्राचार्यो देवतार्थे ४३

**1/01/03/44**— आहवनीयार्थे च ४४

**1/01/03/45**— तं भोजयित्वा यदुच्छिष्टम् ४५

**1/01/04/01**— यदुच्छिष्टं प्राश्नाति १

**1/01/04/02**— हविरुच्छिष्टमेव तत् २

**1/01/04/03**— यदन्यानि द्रव्याणि यथालाभमुपहरति दक्षिणा एव ताः ३

**1/01/04/04**— स एष ब्रह्मचारिणो यज्ञो नित्यप्रततः ४

## अभोज्यम्⑤

**1/01/02/22**— नानुदेश्यं भुञ्जीत २२

**1/01/02/23**— तथा क्षार-लवण-मधु-मांसानि *(गृह्यसूत्र उपनयनप्रकरणे क्षार-लवणयोर् त्र्यहं नियमनात्1 मध्वादेरेव त्र्यहादूर्ध्वं नित्यो निषेधः। )* २३

**1/01/04/05**— न चास्मै श्रुति-विप्रतिषिद्धम् उच्छिष्टं दद्यात् ५

**1/01/04/06**— यथा क्षार-लवण-मधु-मांसानीति ६

**1/01/04/07**— एतेनान्ये नियमा व्याख्याताः ७

**1/01/04/08**— श्रुतिर्हि बलीयस्यानुमानिकादाचारात् ८

**1/01/04/09**— दृश्यते चापि प्रवृत्तिकारणम् ९

**1/01/04/10**— प्रीतिर्ह्य् उपलभ्यते १०

**1/01/04/11**— पितुर् ज्येष्ठस्य च भ्रातुर् उच्छिष्टं भोक्तव्यम् ११

**1/01/04/12**— धर्म-विप्रतिपत्ताव् अभोज्यम् १२

## गुरुदक्षिणा④

**1/02/07/19**— कृत्वा विद्यां यावतीं शक्नुयाद्वेददक्षिणामाहरेद्धर्मतो यथाशक्ति १९

**1/02/07/20**— विषमगते त्वाचार्य उग्रतः शूद्र तो वाहरेत् २०

**1/02/07/21**— सर्वदा शूद्रत उग्रतो वाचार्यार्थस्याहरणं धार्म्यमित्येके २१

**1/02/07/22**— दत्वा च नानुकथयेत् २२

**1/02/07/23**— कृत्वा च नानुस्मरेत् २३

**1/02/07/24**— आत्मप्रशंसां परगर्हामिति च वर्जयेत् २४

## गृहस्थ-धर्मः③

## भोजनम्④

**2/01/01/01**— पाणिग्रहणादधि गृहमेधिनोर्व्रतम् १

**2/01/01/02**— कालयोर्भोजनम् २

**2/01/01/03**— अतृप्तिश्चान्नस्य ३

## जलरक्षणम्④

**2/01/01/15**— नित्यमुदधानान्यद्भिररिक्तानि स्युर्गृहमेधिनोर्व्रतम् १५

## अध्ययन-गौणत्वे④

**1/04/13/19**— निवेशे वृत्ते संवत्सरे संवत्सरे द्वौ द्वौ मासौ समाहित आचार्यकुले वसेद्भूयः श्रुतमिच्छन्न् इति श्वेतकेतुः १९

**1/04/13/20**— एतेन ह्यहं योगेन भूयः पूर्वस्मात्कालाच्छ्रुतमकुर्वीति २०

**1/04/13/21**— तच्छास्त्रैर्विप्रतिषिद्धम् २१

**1/04/13/22**— निवेशे हि वृत्ते नैयमिकानि श्रूयन्ते २२

**1/04/14/01**— अग्निहोत्रमतिथयः १

**1/04/14/02**— यच्चान्यदेवं युक्तम् २

## भृत्याः④

**2/04/09/10**— ये नित्या भाक्तिकास्तेषामनुपरोधेन संविभागो विहितः १०

**2/04/09/11**— काममात्मानं भार्यां पुत्रं वोपरुन्ध्यान्न त्वेव दासकर्मकरम् ११

## नियोगः④

**2/10/27/02**— सगोत्रस्थानीयां न परेभ्यः समाचक्षीत २

**2/10/27/03**— कुलाय हि स्त्री प्रदीयत इत्युपदिशन्ति ३

**2/10/27/04**— तदिन्द्रि यदौर्बल्याद्विप्रतिपन्नम् ४

**2/10/27/05**— अविशिष्टं हि परत्वं पाणेः ५

**2/10/27/06**— तद्व्यतिक्रमे खलु पुनरुभयोर्नरकः ६

**2/10/27/07**— नियमारम्भणो हि वर्षीयान् *(=गरीयान्)* अभ्युदय एवमारम्भणादपत्यात् ७

## पर्व-नियमा, मैथुन-नियमा④

अन्यत्रोक्ताः।

## पत्नी③

## पत्नीत्व-सिद्धिः④

**2/05/11/12**— धर्मप्रजासंपन्ने दारे नान्यां कुर्वीत १२

**2/05/11/13**— अन्यतराभावे कार्या प्राग् अग्न्याधेयात् १३

**2/05/11/14**— आधाने हि सती कर्मभिः संबध्यते येषामेतदङ्गम् १४

**2/06/13/01**— सवर्णा-ऽपूर्व*(=अनन्यव्यूढा)*-शास्त्रविहितायां यथर्तु गच्छतः पुत्रास्तेषां कर्मभिः संबन्धः १

**2/06/13/03**— पूर्ववत्याम्, असंस्कृतायां, वर्णान्तरे च मैथुने दोषः ३

**2/06/13/04**— तत्रापि दोषवान्पुत्र एव ४

## सहत्वम्④

**2/06/14/16**— जाया-पत्योर् न विभागो विद्यते १६

**2/06/14/17**— पाणिग्रहणाद्धि सहत्वं कर्मसु १७

**2/06/14/18**— तथा पुण्यफलेषु १८

**2/06/14/19**— द्रव्यपरिग्रहेषु च १९

**2/06/14/20**— न हि भर्तुर्विप्रवासे नैमित्तिके दाने स्तेयमुपदिशन्ति २०

**2/11/29/03**— कुटुम्बिनौ धनस्येशते ३

**2/11/29/04**— तयोरनुमतेऽन्येऽपि तद्धितेषु वर्तेरन् ४

## स्त्री-व्यभिचारे④

**2/06/13/05**— उत्पादयितुः पुत्र इति हि ब्राह्मणम् ५

**2/06/13/06**— अथाप्युदाहरन्ति ।
इदानीमेवाहं जनक स्त्रीणामीर्ष्यामि नो पुरा ।
यदा यमस्य सादने जनयितुः पुत्रमब्रुवन् ६-१

रेतोधाः पुत्रं नयति परेत्य यमसादने ।
तस्माद्भार्यां रक्षन्ति बिभ्यन्तः पररेतसः ६-२

अप्रमत्ता रक्षथ तन्तुमेतं
मा वः क्षेत्रे परबीजानि वाप्सुः ।
जनयितुः पुत्रो भवति सांपराये
मोघं वेत्ता कुरुते तन्तुमेतम् ६ इति।

*(विवाह-विषयः पृथग् उक्तः।)*

## समावृत्तः③

**1/11/30/01**— विद्यया स्नातीत्येके १

**1/11/30/02**— तथा व्रतेनाष्टाचत्वारिंशत्परीमाणेन २

**1/11/30/03**— विद्याव्रतेन चेत्येके ३

**1/11/30/04**— तेषु सर्वेषु स्नातकवद्वृत्तिः ४

**1/11/30/05**— समाधिविशेषाच्छ्रुतिविशेषाच्च पूजायां फलविशेषः ५

**1/11/30/06**— अथ स्नातकव्रतानि ६

**1/11/30/07**— पूर्वेण ग्रामान् निष्क्रमण-प्रवेशनानि शीलयेद्, उत्तरेण वा ७

**1/11/30/08**— संध्योश् च बहिर्ग्रामाद् आसनं, वाग्-यतश् च ८

**1/11/30/09**— विप्रतिषेधे श्रुतिलक्षणं *(सन्ध्याग्निहोत्रादिचोदकम्)* बलीयः ९

**1/11/30/10**— सर्वान् रागान् वाससि वर्जयेत् १०

**1/11/30/11**— *(वस्त्रं यत्)* कृष्णं च स्वाभाविकम् ११

**1/11/30/12**— अनूद्भासि वासो वसीत १२

**1/11/30/13**— अ-प्रतिकृष्टं *(जीर्णत्वादेः)* च शक्तिविषये १३

**1/11/30/14**— दिवा च शिरसः प्रावरणं वर्जयेन् - मूत्र-पुरीषयोः कर्म परिहाप्य १४

**1/11/30/15**— शिरस् तु प्रावृत्य मूत्र-पुरीषे कुर्याद् - भूम्यां किंचिद् *(तृणादि)* अन्तर्धाय १५

*(मूत्रपुरिषयोर् वर्तनम् अन्यत्रोक्तम्।)*

# गुरौ गौरवदर्शने④

अन्यत्रोक्तम्।

## वेषः④

**1/02/08/02**— माल्यालिप्तमुख उपलिप्तकेशश्मश्रुरक्तोऽभ्यक्तो वेष्टित्युपवेष्टिती काञ्चुक्युपानही पादुकी २

**1/02/08/03**— उदाचारेषु चास्यैतानि न कुर्यात्कारयेद्वा ३

**1/02/08/04**— स्वैरिकर्मसु च ४

**1/02/08/05**— यथा दन्तप्रक्षालनोत्सादनावलेखनानीति ५

**1/02/08/07**— स्नातस्तु काले यथाविध्यभिहृतमाहूतो ऽभ्येतो वा न प्रतिसंहरे इत्येके ७

## आचार्यस्य तस्मिन् वृत्तिः④

**1/02/08/06**— तद्द्रव्याणां च न कथयेदात्मसंयोगेनाचार्यः ६

## उपनयनम्③

## परिचयः④

**1/01/01/09**— **उपनयनं** विद्यार्थस्य श्रुतितः संस्कारः ९

**1/01/01/10**— "सर्वेभ्यो वेदेभ्यः **सावित्र्य्** अनूच्यत" इति हि ब्राह्मणम् १०

...

**2/06/15/23**— अत्र ह्य् अधिकारः *(कर्मसु)* शास्त्रैर् *(दत्ता)* भवति २३

**2/06/15/24**— सा *(=उपनयनम्)* निष्ठा *(=कर्माधिकार-प्रारम्भः)*२४

## कालः④

**1/01/01/19**— **वसन्ते** ब्राह्मणम् उपनयीत, **ग्रीष्मे** राजन्यं शरदि वैश्यं,
**गर्भाष्टमेषु** ब्राह्मणं, **गर्भैकादशेषु** राजन्यं, गर्भ-द्वादशेषु वैश्यम् १९

**1/01/01/20**— अथ *(उपनयन-विषये)* काम्यानि २०

**1/01/01/21**— सप्तमे ब्रह्म-वर्चस-कामम् २१

**1/01/01/22**— अष्टम आयुष्-कामम् २२

**1/01/01/23**— नवमे तेजस्-कामम् २३

**1/01/01/24**— दशमे ऽन्नाद्य-कामम् २४

**1/01/01/25**— एकादश इन्द्रिय-कामम् २५

**1/01/01/26**— द्वादशे पशु-कामम् २६

**1/01/01/27**— आ षोडशाद् ब्राह्मणस्यानात्यय, आ द्वाविंशात् क्षत्रियस्य+ आ चतुर्विंशाद् वैश्यस्य - यथा व्रतेषु समर्थः स्याद् यानि वक्ष्यामः २७

## अतिक्रान्ते काले⑤

**1/01/01/28**— अतिक्रान्ते सावित्र्याः काल*(यु)*, ऋतुं *(यावत्)* त्रैविद्यकं ब्रह्मचर्यं *(अग्नि-परिचर्याम् अध्ययनं गुरु-शुश्रूषाम् इति परिहाप्य)* चरेत् २८

**1/01/01/29**— अथोपनयनम् २९

**1/01/01/30**— ततः संवत्सरम् उदकोपस्पर्शनम् ३०

**1/01/01/31**— अथाध्याप्यः ३१

## अनुपनीतकुलस्य⑤

**1/01/01/33**— तेषाम् अभ्यागमनं भोजनं विवाहम् इति च वर्जयेत् ३३

**1/01/01/34**— तेषाम् इच्छतां प्रायश्चित्तम् ३४

**1/01/01/35**— यथा प्रथमे ऽतिक्रम ऋतुर् एवं संवत्सरः ३५

**1/01/01/36**— अथोपनयनं, तत उदकोपस्पर्शनम् ३६

**1/01/02/01**— प्रति-पूरुषं संख्याय संवत्सरान् यावन्तो ऽनुपेताः स्युः १

**1/01/02/02**— सप्तभिः पावमानीभिर् "यदन्ति यच् च दूरक" इति एताभिर्, यजुष्-पवित्रेण, *(वामदेव्यम्→)*साम-पवित्रेणाङ्गिरसेणेति २

**पावमान्यः**

पव॑माना॒स् सुव॒र्-जनः॑ ।
प॒वित्रे॑ण॒ *(नाना-विषयेषु)* विच॑र्षणिः ।
यꣳ पोता॒ स **पुं॑नातु** मा ।

**पु॒नन्तु॑** मा **देवज॒नाः** ।
पु॒नन्तु॒ **मनं॑वो** धि॒या ।
पु॒नन्तु॒ **विश्वं॑ आ॒यवः॑***(=मनुष्याः)* ।

जातं॑वेदꣳ प॒वित्रं॑वत् ।
प॒वित्रे॑ण **पुनाहि***(=पुनीहि)* मा ।
शु॒क्रेणं॑ देव॒ **दीद्यं॑त्** ।
**अग्ने॒** क्रत्वा॒*(=प्रज्ञया)* क्रतूँ॒र् अनुं॑ ॥46॥

यत् तेँ **प॒वित्रं॑म् अ॒र्चिषिं** ।
अग्ने॑ वित॑तम् अन्त॒रा ।
ब्रह्म॒ तेनं **पुनीमहे** ।

उ॒भाभ्यां॑न् देव **सवितः** ।
प॒वित्रे॑ण स॒वेनं च ।
इ॒दम् ब्रह्मं **पुनीमहे** ।*(5)*

वै॒श्व॒दे॒वी **पुं॑न॒ती** दे॒व्य् **आगां॑त्***(=आगच्छतु)* ।
यस्यैं ब॒ह्वीस् त॒नुवों वी॒त-पृंष्ठाः*(=कान्त-स्तुतयः)* ।
तया॒ **मदं॑न्तस्** सध॒-माद्ये॑षु *(=सह माद्यन्ति येषु सवनेषु)* ।
व॒यँ **स्यां॑म॒** पत॑यो रयी॒णाम् ॥47॥

**वै॒श्वा॒न॒रो** र॒श्मिभिं॑र् मा **पुनातु** ।
**वातं॑॰** प्रा॒णेने॑षि॒रो*(←इष गतौ)* मं॑यो॒भूः ।
**द्यावां॑पृथि॒वी** पयं॑सा॒ पयो॑भिः *(इति क्रमशः)* ।
ऋ॒तावं॑री*(=ऋतवत्यौ)* य॒ज्ञियें मा **पुनीताम्** ।

**यदन्ति**

य"द् अ"न्ति य"च् च दूरके"
भयं" विन्द"ति मा"म् इह"
प"वमान वि" त"ज् जहि

**यजुष्-पवित्रम्**
**विश्वास-प्रस्तुतिः**— आपों अ॒स्मान् मा॒तरं॑श् शुन्धन्तु।*(र४)*
घृतेनं नो घृत॒-पुव॑*(→घृतपावकाः)* पुनन्तु ।
विश्वं॑म् अ॒स्मत् प्र वं॑हन्तु रि॒प्रम्*(=पापम्) (र५)*
उद् *(अद्भ्य)* आं॑भ्य॒श् शुचि॒र् आ पू॒त एं॑मि ।*(र५)*

**साम-पवित्रम्**

**ऋक्**

१ २ ३१ २र ३ २ ३ २३ २ १ २ २ ३ १ २ ३ २
कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता ॥ 12-1:0682 ॥

**विश्वास-शाकल-प्रस्तुतिः**— क"या नश् चित्र" *(→इन्द्रः)* **आ" भुवद् ऊती"** *(=रक्षणम्/ तर्पणम् [तेन])*, सदा"-वृधः *(=वर्धमानः)* स"खा ।
क"या श"चिष्ठया *(=प्रज्ञावता)* वृता" *(=वर्तनेन)* १

१ २ ३ १ २र ३ १ २ ३१ २ ३ १ २ ३ २ ३ १ २
कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः। दृढा चिदारुजे वसु ॥ 12-2:0683 ॥

**विश्वास-शाकल-प्रस्तुतिः**— क"स् त्वा सत्यो" म"दानां
मं"हिष्ठो *(=पूज्यः)* **मत्सद्** *(=मादयेद्)* अ"न्धसः*(= भोज्यः (→[सोमः]))* ।
दृळ्हा" *(=ढम्)* चिद् **आरु"जे** *(=सम्भङ्क्तुम्)* व"सु २
३ २उ ३ १ २ ३ १ २ ३ २ ३१ २ ३ १ २

अभी षु णः सखीनामविता जरितृणाम्। शतं भवास्यूतये ॥ 12-3:0684 ॥॥12(टा)॥

**विश्वास-शाकल-प्रस्तुतिः**— अभी" षु" णः स"खीनाम्
**अविता**" जरितृणा"म् *(=स्तोतृणाम्)*।
शतं" **भवास्य्** ऊति"भिः *(=रक्षाभिः)*३
*(अभिभवसि = सम्मुखो भवसि)*

**साम - वामदेव्यम्।**

वामदेव्यम् ।

का*([टा]%)*याअ । न*([धु])*श्चा*(३)*अइत्रा*(३)*आ*(["])* भुवात*(v)*।
ऊ*([त]%३)*ती*([गो]--%३)*। सादा*(["])*, वृधस्, सा*(३--%)*खा*([त]३--%)*।
औ*([पे])*हो*("३)*हाइ।
क*([तः])*या*(--%३)*अ +शचाइ,,ष्ठ*([टि])*यौ*(")*हो।
ओ हिं*([ता])*म्मा*([प्रे])*अ।
वा*("३[फ])*आर्तो*(")*, ओ*(")*हाइ ।।

का*(%)*स्*([टा])* त्वा*(")*अ। स*([धु])*त्यो*(")*ओ, मा*(%)*दा*(%)*ना*(")*अम् ।
मा*([त]%)*ं,हि*([गो])*ष्ठो*(["])*ओ, मात्साद्, अन्धा*(३--%)*,, सा*([त]--%३)*।
औ*([पे])*हो*("३)*हाइ।
दृ*([तः])*ढा*(--%३)*अ चिदा। रु*([टी])*जौ*(["])*हो*(["])*।
ओ हिं*([ता])*म्मा*([प्रे])*अ।
वा*("३)*आ*([फ])*सो, ओ*(")*हाइ॥

आ*([टा]%)*भि*(")*इ । षु*([धु])* णा*(")*अ, स्सा*(%)*खि*(%)*ना*(")*अम्।
आ*([त]%)*वि*([घि])*ता*(["])*अ, जराइत्री*(["])*इणा*(--%३)*म्*([त])* ।
औ*([पे])*हो*("३)*हाइ।
श*([तः])*ता*(--%३)*अम् भव,,सि*([टी])* यौ*(["])* हो।
ओ हिं*([ता])*म्मा*([प्रे])*अ। [ऊ]*(v)*ता*([फ]"३)*आयो, ओ*(")*हाइ ।।

**आङ्गीरसम्**

*(अहं)* हँसश् शुंचि-षद्, वसुंर् अन्तरिक्ष-सद्,
+होतां वेदि-षद्, अतिंथिर् दुरोण-सत् ।
नृ-षद्, वंर-सद्, ऋंत-सद् व्योंम-सद्,
अब्-जा, गो-जा, ऋंत-जा, अंद्रि-जा, ऋतं बृहत् ॥

**1/01/02/03**— अपि वा व्याहृतीभिर् एव ३

**1/01/02/04**— अथाध्याप्यः ४

**1/01/02/05**— अथ यस्य प्रपितामहादि नानुस्मर्यत उपनयनं - ते श्मशान-संस्तुताः ५

**1/01/02/06**— तेषाम् अभ्यागमनं भोजनं विवाहम् इति च वर्जयेत्। तेषामिच्छतां प्रायश्चित्तं - द्वादशवर्षाणि त्रैविद्यकं ब्रह्मचर्यं चरेद् । अथोपनयनं तत उदकोपस्पर्शनं पावमान्यादिभिः ६

**1/01/02/07**— अथ गृहमेधोपदेशनम् ७

**1/01/02/08**— नाध्यापनम् ८

**1/01/02/09**— ततो यो निर्वर्तते तस्य संस्कारो यथा प्रथमेऽतिक्रमे ९

**1/01/02/10**— तत ऊर्ध्वं प्रकृतिवत् १०

## वानप्रस्थः③

**2/09/21/18**— अथ वानप्रस्थः १८

## अधिकारः④

**2/09/22/06**— अथ वानप्रस्थस्यैवानुपूर्व्यम् एक उपदिशन्ति ६

**2/09/22/07**— विद्यां समाप्य
दारं कृत्वाग्नीन् आधाय
कर्माण्य् आरभते, सोमावरार्ध्यानि यानि श्रूयन्ते ७

**2/09/22/08**— गृहान् कृत्वा सदारः सप्रजः सहाग्निभिर् बहिर्ग्रामाद् वसेत् ८

**2/09/22/09**— एको वा ९

## प्रव्रजनम्④

**2/09/22/15**— तस्य द्वन्द्वं द्रव्याणाम् एक उपदिशन्ति -
पाकार्थ-भोजनार्थ-
वासि*(=chisel)*-परशु-दात्र*(=असिद)*-काजानाम्*(=mallet)* १५

**2/09/22/16**— द्वंद्वानाम् एकैकम् आदायेतराणि *(भार्यायै)* दत्वा ऽरण्यम् अवतिष्ठेत १६

## विधिः④

**2/09/21/19**— अत एव ब्रह्मचर्यवान्प्रव्रजति १९

**2/09/21/20**— तस्योपदिशन्ति २०

**2/09/21/21**— एकाग्निर् अनिकेतः स्याद्
अशर्माशरणो मुनिः २१

**2/09/21/21**— एकाग्निर् अनिकेतः स्याद्
अशर्माशरणो मुनिः २१

**2/09/22/10**— शिलोञ्छेन *(=उपात्तशस्यात् क्षेत्रात् शेषावचयनेन)* वर्तयेत् १०

**2/09/22/11**— न चात ऊर्ध्वं प्रतिगृह्णीयात् ११

**2/09/22/12**— अभिषिक्तश् च जुहुयात् १२

**2/09/22/17**— तस्यारण्येनैवात ऊर्ध्वं होमो, वृत्तिः, *(अतिथि-)*प्रतीक्षा, ऽऽच्छादनं च १७

**2/09/22/18**— येषु कर्मसु पुरोडाशाश् चरवस्
तेषु कार्याः १८

**2/09/22/19**— सर्वं चोपांशु - सह स्वाध्यायेन १९

**2/09/22/20**— नारण्यम् अभ्याश्रावयेत् २०

**2/09/22/22**— आकाशे स्वयम् *(न गृहे)* २२

**2/09/22/23**— अनुपस्तीर्णे शय्य्-आसने

## भोजनम्④

**2/09/22/01**— तस्यारण्यम् आच्छादनं विहितम् १

**2/09/22/02**— ततो मूलैः फलैः पर्णैस् तृणैर् इति वर्तयंश् चरेत् २

**2/09/22/03**— अन्ततः प्रवृत्तानि *(= स्वयम् पतितानि)* ३

**2/09/22/04**— ततोऽपो वायुम् आकाशम् इत्य् अभिनिश्रयेत् ४

**2/09/22/05**— तेषाम् उत्तर उत्तरः संयोगः फलतो विशिष्टः ५

**2/09/22/24**— नवे सस्ये प्राप्ते पुराणम् अनुजानीयात् *(विसर्जनाय)* २४

**2/09/23/01**— भूयांसं वा नियमम् इच्छन्न्
अन्वहम् एव पात्रेण सायं प्रातर् अर्थम् आहरेत् १

**2/09/23/02**— ततो मूलैः फलैः पर्णैस् तृणैर् इति वर्तयंश् चरेद्
अन्ततः प्रवृत्तानि *(=स्वयम्पतितानि)*,
ततोऽपो वायुम् आकाशम्

इत्य् अभिनिश्रयेत्।
तेषामुत्तर उत्तरः संयोगः फलतो विशिष्टः २

## विवाहः③

## कन्यादाने निषेधाः④

**2/05/11/15**— सगोत्राय दुहितरं न प्रयच्छेत् १५

**2/05/11/16**— मातुश्च योनिसंबन्धेभ्यः १६

## विवाहप्रकाराः④

**2/05/11/17**— ब्राह्मे विवाहे बन्धुशीलश्रुतारोग्याणि बुद्ध्वा प्रजासहत्वकर्मभ्यः प्रतिपादयेच्छक्तिविषयेणालंकृत्य १७

**2/05/11/18**— आर्षे दुहितृमते मिथुनौ गावौ देयौ १८

**2/05/11/19**— दैवे यज्ञतन्त्र ऋत्विजे प्रतिपादयेत् १९

**2/05/11/20**— मिथः कामात्सांवर्तेते स गान्धर्वः २०

**2/05/12/01**— शक्ति-विषयेण द्रव्याणि दत्वा वहेरन् - स आसुरः १

**2/05/12/02**— दुहितृमतः प्रोथयित्वा वहेरन् - स राक्षसः २

**2/05/12/03**— तेषां त्रय आद्याः प्रशस्ताः, पूर्वः पूर्वः श्रेयान् ३

**2/05/12/04**— यथा युक्तो विवाहस् - तथा युक्ता प्रजा भवति ४

## विवाह-विधिः④

**2/06/13/11**— विवाहे दुहितृमते दानं काम्यं धर्मार्थं श्रूयते तस्माद्दुहितृमतेऽधिरथं शतं देयं तन्मिथुया कुर्यादिति ११-१

तस्यां क्रयशब्दः संस्तुतिमात्रम् । धर्माद्धि संबन्धः ११-२

## पुत्रः②

## प्रजा-प्रशंसा③

**2/09/24/01**— अथाप्यस्य प्रजातिम्
अमृतम् आम्नाय आह । प्रजामनु प्रजायसे तदु ते मर्त्यामृतमिति १

**2/09/24/02**— अथापि - स एवायं विरूढः पृथक् प्रत्यक्षेणोपलभ्यते दृश्यते चापि सारूप्यं देहत्वमेवान्यत् २

**2/09/24/03**— ते शिष्टेषु कर्मसु वर्तमानाः पूर्वेषां सांपरायेण कीर्तिं स्वर्गं च वर्धयन्ति ३

**2/09/24/04**— एवमवरोऽवरः परेषाम् *(=पूर्विकाणाम्)* ४

**2/09/24/05**— आ भूतसंप्लवात् ते स्वर्गजितः ५

**2/09/24/06**— पुनः सर्गे बीजार्था भवन्तीति भविष्यत्पुराणे ६

**2/09/24/07**— अथापि प्रजापतेर्वचनम् ७

**2/09/24/08**— त्रयीं विद्यां ब्रह्मचर्यं प्रजातिं श्रद्धां तपो यज्ञमनुप्रदानम् । य एतानि कुर्वते तैरित् सह *(वयम् प्रजापतयः)* स्मो, रजो भूत्वा ध्वंसते ऽन्यत् प्रशंसन्न् इति ८

## प्रजा-पाप-फलम्③

**2/09/24/09**— तत्र ये पापकृतस्त एव ध्वंसन्ति यथा पर्णं वनस्पतेर्न परान्हिंसन्ति ९

**2/09/24/10**— नास्यास्मिंल् लोके कर्मभिः संबन्धो विद्यते तथा परस्मिन्कर्मफलैः १०

**2/09/24/11**— तदेतेन वेदितव्यम् ११

**2/09/24/12**— प्रजापतेर्ऋषीणामिति सर्गोऽयम् १२

**2/09/24/13**— तत्र ये पुण्यकृतस् तेषां प्रकृतयः परा ज्वलन्त्य *(= तारारूपेण)* उपलभ्यन्ते १३

**2/06/13/01**— सवर्णा-ऽपूर्व*(=अनन्यव्यूढा)*-शास्त्रविहितायां यथर्तु गच्छतः पुत्रास्तेषां कर्मभिः संबन्धः १

**2/06/13/03**— पूर्ववत्याम्, असंस्कृतायां, वर्णान्तरे च मैथुने दोषः ३

**2/06/13/04**— तत्रापि दोषवान्पुत्र एव ४

## स्त्री-व्यभिचारे③

**2/06/13/05**— उत्पादयितुः पुत्र इति हि ब्राह्मणम् ५

**2/06/13/06**— अथाप्युदाहरन्ति ।
इदानीमेवाहं जनक स्त्रीणामीर्ष्यामि नो पुरा ।
यदा यमस्य सादने जनयितुः पुत्रमब्रुवन् ६-१

रेतोधाः पुत्रं नयति परेत्य यमसादने ।
तस्माद्भार्यां रक्षन्ति बिभ्यन्तः पररेतसः ६-२

अप्रमत्ता रक्षथ तन्तुमेतं
मा वः क्षेत्रे परबीजानि वाप्सुः ।
जनयितुः पुत्रो भवति सांपराये
मोघं वेत्ता कुरुते तन्तुमेतम् ६ इति।

*(दायभाग-विषयोऽन्यत्र।)*

## राजा②

**2/09/25/01**— व्याख्याताः सर्ववर्णानां साधारणवैशेषिका धर्माः । राज्ञस्तु विशेषाद्वक्ष्यामः १

## पुर-व्यवस्था③

**2/09/25/02**— दक्षिणाद्वारं वेश्म पुरं च मापयेत् २

**2/09/25/03**— अन्तरस्यां पुरि वेश्म ३

**2/09/25/04**— तस्य पुरस्तादावसथस्तदामन्त्रणमित्याचक्षते ४

**2/09/25/05**— दक्षिणेन पुरं सभा दक्षिणोदग्द्वारा यथोभयं संदृश्येत बहिरन्तरं चेति ५

**2/09/25/06**— सर्वेष्वेवाजस्रा अग्नयः स्युः ६

**2/09/25/07**— अग्निपूजा च नित्या यथा गृहमेधे ७

**2/09/25/08**— आवसथे श्रोत्रियावरार्ध्यानतिथीन्वासयेत् ८

**2/09/25/09**— तेषां यथागुणमावसथाः शय्यान्नपानं च विदेयम् ९

## दानम्, पोषणम्③

**2/09/25/08**— आवसथे श्रोत्रियावरार्ध्यानतिथीन्वासयेत् ८

**2/09/25/09**— तेषां यथागुणमावसथाः शय्यान्नपानं च विदेयम् ९

**2/09/25/10**— गुरूनमात्यांश्च नातिजीवेत् १०

**2/09/25/11**— न चास्य विषये क्षुधा रोगेण हिमातपाभ्यां वावसीदेदभावाद्बुद्धिपूर्वं वा कश्चित् ११

## आयुध-मनोरञ्जन-निरोधः③

**2/09/25/14**— आयुधग्रहणं नृत्तगीतवादित्राणीति राजाधीनेभ्योऽन्यत्र न विद्येरन् १४

## रक्षा③

**2/09/25/15**— क्षेमकृद्राजा यस्य विषये ग्रामेऽरण्ये वा तस्करभयं न विद्यते १५

**2/10/26/02**— ब्राह्मणस्वान्यपजिगीषमाणो राजा यो हन्यते तमाहुरात्मयूपो यज्ञोऽनन्तदक्षिण इति २

**2/10/26/03**— एतेनान्ये शूरा व्याख्याताः प्रयोजने युध्यमानास्तनुत्यजः ३

**2/10/26/04**— ग्रामेषु नगरेषु चार्यान्शुचीन्सत्यशीलान्प्रजागुप्तये निदध्यात् ४

**2/10/26/05**— तेषां पुरुषास्तथागुणा एव स्युः ५

**2/10/26/06**— सर्वतो योजनं नगरं तस्करेभ्यो रक्ष्यम् ६

**2/10/26/07**— क्रोशो ग्रामेभ्यः ७

**2/10/26/08**— तत्र यन्मुष्यते तैस्तत्प्रतिदाप्यम् ८

दण्डन-विचारोऽन्यत्रोक्तः।

## करः③

**2/10/26/09**— धार्म्यं शुल्कमवहारयेत् ९

**2/10/26/10**— अकरः श्रोत्रियः १०

**2/10/26/11**— सर्ववर्णानां च स्त्रियः ११

**2/10/26/12**— कुमाराश्च प्राग् व्यञ्जनेभ्यः १२

**2/10/26/13**— ये च विद्यार्था वसन्ति १३

**2/10/26/14**— तपस्विनश्च ये धर्मपराः १४

**2/10/26/15**— शूद्रश्च पादावनेक्ता *(= पादधावनजीवी)* १५

**2/10/26/16**— अन्धमूकबधिररोगविष्टाश्च १६

**2/10/26/17**— ये व्यर्था *(=मुक्ताश् शास्त्रैः)* द्रव्यपरिग्रहैः १७

## पशु-रक्षणम्③

**2/11/28/06**— अवरुध्य पशून्मारणे नाशने वा स्वामिभ्योऽवसृजेत् ६

**2/11/28/07**— प्रमादादरण्ये पशूनुत्सृष्टान्दृष्ट्वा ग्राममानीय स्वामिभ्योऽवसृजेत् ७

**2/11/28/08**— पुनः प्रमादे सकृदवरुध्य ८

**2/11/28/09**— तत ऊर्ध्वं न सूर्क्षेत् ९

1. https://vishvAsa.github.io/vedAH_yajuH/taittirIyam/sUtram/ApastambaH/gRhyam/karmANi/upanayanam

# +तत्त्वानि①

## ॐकारः②

**1/04/13/06**— ॐकारः स्वर्गद्वारं तस्माद्ब्रह्माध्येष्यमाण एतदादि प्रतिपद्येत ६

**1/04/13/07**— विकथां चान्यां कृत्वैवं लौकिक्या वाचा व्यावर्तते ब्रह्म ७

**1/04/13/08**— यज्ञेषु चैतदादयः प्रसवाः ८

**1/04/13/09**— लोके च भूतिकर्मस्वेतदादीन्येव वाक्यानि स्युर्यथा पुण्याहं स्वस्त्यृद्धिमिति ९

## अशौचम्②

### बाल-प्रयतता③

**2/06/15/19**— आऽन्न-प्राशनाद् गर्भा नाप्रयता भवन्ति १९

**2/06/15/20**— आ परिसंवत्सराद् इत्येके २०

**2/06/15/21**— यावता या दिशो न प्रजानीयुः २१

**2/06/15/22**— ओपनयनाद् इत्य् अपरम् २२

**2/06/15/23**— अत्र ह्य् अधिकारः *(कर्मसु)* शास्त्रैर् *(दत्ता)* भवति २३

**2/06/15/25**— स्मृतिश्च *(एवं विद्यते)* २५

### अशौच-कारणानि③

**1/05/15/07**—

- रिक्तपाणिर् वयस उद्यम्याप उपस्पृशेत् ७

**1/05/15/16**—

- शूनोपहतः सचेलो ऽवगाहेत १६

**1/05/15/17**— प्रक्षाल्य वा तं देशम् अग्निना संस्पृश्य पुनः प्रक्षाल्य पादौ चाचम्य प्रयतो भवति १७

**1/05/15/23**—

- मूत्रं कृत्वा पुरीषं वा मूत्रपुरीष-लेपान् अन्नलेपान् उच्छिष्टलेपान् रेतसश् च ये लेपास्, तान् प्रक्षाल्य पादौ च, +आचम्य प्रयतो भवति २३

**1/05/16/10**— श्यावान्तपर्यन्ताव् ओष्ठाव् उपस्पृश्याचामेत् १०

**1/05/16/11**—

- न श्मश्रुभिर् उच्छिष्टो भवत्य् अन्तरास्ये सद्भिर् यावन् न हस्तेनोपस्पृशति ११

**1/05/16/12**—

- य आस्याद्बिन्दवः पतन्त उपलभ्यन्ते तेष्वाचमनं विहितम् १२

**1/05/16/13**— ये भूमौ न तेष्वाचामेदित्येके १३

**1/05/16/14**—

- स्वप्ने क्षवथौ शृङ्खाणिका*(=नासामलम्)*-ऽऽश्रव्-आलम्भे, लोहितस्य केशानाम्, अग्नेर्, गवां, ब्राह्मणस्य, स्त्रियाश् चालम्भे, महापथं च गत्वा ऽमेध्यं चोपस्पृश्याप्रयतं च मनुष्यं, नीवीं च परिधाय +अप उपस्पृशेत् १४

**1/05/16/15**— आर्द्रं वा शकृद् ओषधीर् भूमिं वा १५

# मृताशौचम्③

**2/06/15/02**— मातुश् च योनि-संबन्धेभ्यः पितुश् *(स्वेन साकं)* चासप्तमात् पुरुषाद्
यावता वा संबन्धो ज्ञायते
तेषां प्रेतेषूदकोपस्पर्शनं
*(मृतान्)* गर्भान्*(=बालान्)* परिहाप्यापरिसंवत्सरान् २

**2/06/15/03**— माता-पितराव् एव तेषु *(मृतापरिसंवत्सरेषु गर्भेषु)* ३

**2/06/15/04**— हर्तारश् च ४

**2/06/15/05**— भार्यायां परम-गुरु*(=आचार्य-मातृ-पितृ)*-संस्थायां *(=मरणे)* च *(परेद्युर्)* +आकालम् *(२४ होराणाम्)* अभोजनम् ५

**2/06/15/06**— आतुर*(=शोक)*व्यञ्जनानि कुर्वीरन् ६

**2/06/15/07**— केशान् प्रकीर्य पांसूना, *(केशान्)* उप्य, एक-वाससो दक्षिणा-मुखाः सकृद्-उपमज्ज्योत्तीर्योपविशन्ति ७

**2/06/15/08**— एवं त्रिः ८

**2/06/15/09**— *("मह्यम् उदकं दत्तम्" इति)* तत्*(→प्रेत)*-प्रत्ययम् उदकम् उत्सिच्य
+अ-प्रतीक्षा ग्रामम् एत्य
यत् स्त्रिय आहुस् तत् कुर्वन्ति ९

**2/06/15/10**— इतरेषु चैतद् एवैक उपदिशन्ति १०

## अनध्यायः④

**1/03/10/03**— तथा संबन्धेषु ज्ञातिषु *(मृतेषु त्र्यहम् अनध्याय इति ब्रह्मचारिनियमः। इतरेषाम् आशौचवतां तु यावद् आशौचमनध्यायः)*३

**1/03/10/04**— मातरि पितर्य् आचार्य इति द्वादशाहाः ४

**1/03/10/05**— तेषु चोदकोपस्पर्शनं तावन्तं कालम् ५

## वपनम्④

**1/03/10/06**— अनु-भाविनां*(=पश्चाज्-जातानां)* च परिवापनम् ६

**1/03/10/07**— न समावृत्ता *(केशान्)* वपेरन्न् अन्यत्र *(याग-)*विहाराद् इत्येके ७

**1/03/10/08**— अथापि ब्राह्मणं - "रिक्तो वा एषोऽनपिहितो यन् मुण्डः। तस्यैतद् अपिधानं यच् छिखे"ति ८

**1/03/10/09**— सत्रेषु तु वचनाद् वपनं शिखायाः ९

## अन्यत्रोक्तानि③

प्रायश्चित्तम् अपपात्र-संसर्गे।

## चौक्षता③

**1/05/15/13**— मूढस्वस्तरे चासंस्पृशन्न् अन्यानप्रयतान्प्रयतो मन्येत १३

**1/05/15/14**— तथा तृणकाष्ठेषु निखातेषु १४

## दायभागः②

## अधिकारिणः③

**2/06/14/01**— जीवन्पुत्रेभ्यो दायं विभजेत्समं क्लीबमुन्मत्तं पतितं च परिहाप्य १

**2/06/14/02**— पुत्राभावे यः प्रत्यासन्नः सपिण्डः २

**2/06/14/01**— जीवन्पुत्रेभ्यो दायं विभजेत्समं क्लीबमुन्मत्तं पतितं च परिहाप्य १

**2/06/14/02**— पुत्राभावे यः प्रत्यासन्नः सपिण्डः २

**2/06/14/04**— दुहिता वा ४

**2/06/14/05**— सर्वाभावे राजा दायं हरेत ५

**2/06/14/14**— सर्वे हि धर्मयुक्ता भागिनः १४

**2/06/14/15**— यस्त्वधर्मेण द्रव्याणि प्रतिपादयति *(=व्ययीकरोति)* ज्येष्ठोऽपि तमभागं कुर्वीत १५

ज्येष्ठेतराधिकारे -

**2/06/14/06**— ज्येष्ठो दायाद इत्येके ६

**2/06/14/10**— तच्छास्त्रैर्विप्रतिषिद्धम् १०

**2/06/14/11**— मनुः पुत्रेभ्यो दायं व्यभजदित्यविशेषेण श्रूयते ११

**2/06/14/12**— अथापि तस्माद्ज्येष्ठं पुत्रं धनेन निरवसाययन्तीत्येकवच्छ्रुयते १२

**2/06/14/13**— *(समाधानम् -)* अथापि नित्यानुवादमविधिमाहुर्न्यायविदो, यथा - "तस्मादजावयः पशूनां सह चरन्तीति" "तस्मात्स्नातकस्य मुखं रेभायतीव" "तस्माद्बस्तश्च श्रोत्रियश्चस्त्रीकामतमाविति" १३

**2/06/14/14**— सर्वे हि धर्मयुक्ता भागिनः १४

## चोदनम्③

**2/06/13/12**— एकधनेन ज्येष्ठं तोषयित्वा १२

**2/06/13/01**— सवर्णा-ऽपूर्व*(=अनन्यव्यूढा)*-शास्त्रविहितायां यथर्तु गच्छतः पुत्रास्तेषां कर्मभिः संबन्धः १

**2/06/14/07**— देशविशेषे सुवर्णङ्कृष्णा गावः कृष्णं भौमं ज्येष्ठस्य ७

**2/06/14/08**— रथः पितुः परीभाण्डं च गृहे ८

**2/06/14/09**— अलंकारो भार्याया ज्ञातिधनं चेत्येके ९

**2/06/14/16**— जाया-पत्योर् न विभागो विद्यते १६

## धर्मः②

**1/07/20/01**— नेमं लौकिकम्-अर्थं पुरस्कृत्य
धर्मांश् चरेत् १

**1/07/20/02**— निष्फला ह्य् अभ्युदये भवन्ति २

**1/07/20/03**— तद् यथा ऽऽम्रे फलार्थे निर्मिते
छाया गन्ध इत्य् अनूत्पद्येते,
एवं धर्मं चर्यमाणम् अर्था अनूत्पद्यन्ते ३

**1/07/20/04**— नो चेद् अनूत्पद्यन्ते,
न धर्म-हानिर् भवति ४

## साधारण-धर्माः③

**1/08/23/06**— अक्रोधोऽहर्षोऽरोषोऽलोभोऽमोहोऽदम्भोऽद्रोहः सत्यवचनमनत्याशोऽपैशुनमनसूया संविभागस्त्याग आर्जवं मार्दवं शमो दमः सर्वभूतैरविरोधो योग आर्यमानृशंसं तुष्टिरिति सर्वाश्रमाणां समयपदानि तान्यनुतिष्ठन्विधिना सार्वगामी भवति ६

**2/09/21/03**— सर्वेषाम् उपनयन-प्रभृति समान आचार्य-कुले वासः ३

**2/09/21/04**— सर्वेषाम् अनूत्सर्गो विद्यायाः ४

**2/09/21/05**— बुद्ध्वा कर्माणि यत् कामयेत तद् आरभेत ५

**2/09/21/06**— यथा विद्यार्थस्य नियम,
एतेनैवान्तम् अनूपसीदत*(ः= उपसदनतः)*
आचार्य-कुले शरीर-न्यासो ब्रह्मचारिणः *(नैष्ठिकस्य)*६

**2/09/24/07**— अथापि प्रजापतेर्वचनम् ७

**2/09/24/08**— त्रयीं विद्यां ब्रह्मचर्यं प्रजातिं श्रद्धां तपो यज्ञमनुप्रदानम् । य एतानि कुर्वते तैरित् सह *(वयम् प्रजापतयः)* स्मो, रजो भूत्वा ध्वंसते ऽन्यत् प्रशंसन्न् इति ८

**2/09/24/13**— तत्र ये पुण्यकृतस् तेषां प्रकृतयः परा ज्वलन्त्य *(= तारारूपेण)* उपलभ्यन्ते १३

## आश्रमाः③

**2/09/21/01**— चत्वार आश्रमा गार्हस्थ्यम् आचार्यकुलं मौनं *(=मुनिता/ सन्यासः)* वानप्रस्थ्यम् इति १

**2/09/21/02**— तेषु सर्वेषु यथोपदेशम् अव्यग्रो वर्तमानः क्षेमं गच्छति २

## वर्णः③

**1/01/01/04**— चत्वारो **वर्णा** ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः ४

**1/01/01/05**— तेषां पूर्वस्-पूर्वो जन्मतः श्रेयान् ५

**2/01/02/02**— सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखम् २

**2/01/02/03**— ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपं वर्णं बलं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यते । तच्चक्रवदुभयोर्लोकयोः सुख एव वर्तते ३

**2/01/02/04**— यथौषधिवनस्पतीनां बीजस्य क्षेत्रकर्मविशेषे फलपरिवृद्धिरेवम् ४

*(पाप-पुण्य-फलाभ्यां वर्ण-परिवर्तनम् अन्यत्रोक्तम्)*

## ब्राह्मणवृत्तिः④

**2/05/10/04**— न तदाद्रियेत

**2/05/10/05**— स्वकर्म ब्राह्मणस्याध्ययनमध्यापनम्यज्ञो याजनं दानं प्रतिग्रहणं दायाद्यं शिलोञ्छः ४

**1/07/20/10**— अविहिता ब्राह्मणस्य वणिज्या १०

**1/07/20/11**— आपदि व्यवहरेत पण्यानाम्
अपण्यानि व्युदस्यन् *(=वर्जयन् [वक्ष्यमाणानि] ...)* ११

**1/07/21/03**— नात्यन्तमन्ववस्येत् ३

**1/07/21/04**— वृत्तिं प्राप्य विरमेत् ४

## क्षत्रिय-वृत्तिः④

**2/05/10/06**— अन्यच्चापरिगृहीतम् *(यथा मूलफलादिः)*५

**2/05/10/07**— एतान्येव क्षत्रियस्याध्यापनयाजनप्रतिग्रहणानीति परिहाप्य दण्डयुद्धाधिकानि ६

## शूद्रधर्मः④

**1/01/01/07**— **शुश्रूषा** शूद्रस्येतरेषां वर्णानाम् *(फलवत् कर्म)*७

**1/01/01/08**— *(शूद्र-कृत-सेवा)* पूर्वस्मिन् पूर्वस्मिन् वर्णे निःश्रेयसम् भूयः ८

## सम्बद्धविषयाः③

"पापम्, पुण्यम्, दोषाः" इत्यादयो ऽन्यत्र। एवं विशेषा अपि।

## धर्मे प्रमाणम्②

**1/01/01/01**— अथातः सामयाचारिकान् धर्मान् व्याख्यास्यामः १

**1/01/01/02**— धर्मज्ञ-समयः **प्रमाणम्** *(सौलभ्य-क्रमेण प्रथमम् उक्तम्)* २

**1/01/01/03**— वेदाश् च ३

**2/11/29/13**— कृच्छ्रा धर्मसमाप्तिः समाम्नातेन । लक्षणकर्मणात्तु समाप्यते १३

# शिष्टाचारे स्मृत्यन्तरे च③

**1/01/04/08**— श्रुतिर्हि बलीयस्यानुमानिकादाचारात् ८

**1/03/11/38**— यथोक्तमन्यदतः परिषत्सु ३८

**1/04/12/10**— ब्राह्मणोक्ता विधयस्तेषामुत्सन्नाः पाठाः प्रयोगादनुमीयन्ते १०

**1/04/12/11**— यत्र तु प्रीत्युपलब्धितः प्रवृत्तिर्न तत्र शास्त्रमस्ति ११

**1/07/20/05**— अन्-असूयुर्, दुष्-प्रलम्भः स्यात्
कुहक-शठ-नास्तिक-बाल-वादेषु ५

**1/07/20/06**— न धर्माधर्मौ चरत
"आवं स्व" इति ।
न देव-गन्धर्वा, न पितर *(पुर आगत्य)* इत्य् आचक्षते
"ऽयं धर्मो ऽयम् अधर्म" इति ६

**1/07/20/07**— यत् त्व् आर्याः
क्रियमाणं प्रशंसन्ति
स धर्मो,
यद् गर्हन्ते
सोऽधर्मः ७

**1/07/20/08**— सर्व-जन-पदेष्व् एकान्त-समाहितम्
आर्याणाम् वृत्तं
सम्यग् विनीतानां वृद्धानाम्
आत्मवताम्, अलोलुपानाम्, अदाम्भिकानां वृत्त-सादृश्यं भजेत ८

**1/11/30/09**— विप्रतिषेधे श्रुतिलक्षणं *(सन्ध्याग्निहोत्रादिचोदकम्)* बलीयः ९

**1/11/32/29**— यच् चान्यत् परिचक्षते, यच् चान्यत् परिचक्षते २९

**2/08/20/17**— यच् चान्यत् परिचक्षते १७

**2/06/13/07**— दृष्टो धर्मव्यतिक्रमः साहसं च पूर्वेषाम् ७

**2/06/13/08**— तेषां तेजोविशेषेण प्रत्यवायो न विद्यते ८

**2/06/13/09**— तदन्वीक्ष्य प्रयुञ्जानः सीदत्यवरः ९

# देश-कुलाचारेषु③

**2/06/15/01**— एतेन देशकुलधर्मा *(=शास्त्राऽविरुद्धा एव)* व्याख्याताः १

**2/11/29/13**— कृच्छ्रा धर्मसमाप्तिः समाम्नातेन । लक्षणकर्मणात्तु समाप्यते १३

**2/11/29/14**— तत्र लक्षणम् । सर्वजनपदेष्वेकान्तसमाहितमार्याणां वृत्तं सम्यग्विनीतानां वृद्धानामात्मवतामलोलुपानामदाम्भिकानां वृत्तसादृश्यं भजेत । एवमुभौ लोकावभिजयति १४

# स्त्री-शूद्राश्च③

**2/11/29/11**— सा निष्ठा या विद्या स्त्रीषु शूद्रेषु च ११

**2/11/29/12**— आथर्वणस्य वेदस्य शेष इत्युपदिशन्ति १२

**2/11/29/15**— स्त्रीभ्यः सर्ववर्णेभ्यश्च धर्मशेषान्प्रतीयादित्येक इत्येके १५

## कामः②

कामासक्तौ पापसम्भवो ऽन्यत्रोक्तः।

**2/08/20/22**— भोक्ता च धर्माविप्रतिषिद्धान् भोगान् *(5)*२२

**2/08/20/23**— एवम् उभौ लोका वभिजयति २३

## पापम्②

## कामस्यापायः③

**1/04/12/11**— यत्र तु प्रीत्युपलब्धितः प्रवृत्तिर्न तत्र शास्त्रमस्ति ११

**1/04/12/12**— तदनुवर्तमानो नरकाय राध्यति १२

**1/04/13/04**— हृष्टो दर्पति दृप्तो धर्ममतिक्रामति धर्मातिक्रमे खलु पुनर्नरकः ४

# अशुचिकराणि③

**1/07/21/12**— अथाशुचिकराणि १२

**1/07/21/13**— शूद्र-गमनम् आर्य-स्त्रीणाम् १३

**1/07/21/14**— प्रतिषिद्धानां मांस-भक्षणम् १४

**1/07/21/15**— *(यथा -)* शुनो मनुष्यस्य च
कुक्कुट-सूकराणां ग्राम्याणां, क्रव्यादसाम् १५

**1/07/21/16**— मनुष्याणां मूत्र-पुरीष-प्राशनम् १६

**1/07/21/17**— शूद्रोच्छिष्टम्,
*(प्रतिलोमाद्य्-)*अपपात्रा-गमनं चार्याणाम् १७

**1/07/21/18**— एतान्यपि पतनीयानीत्य् एके १८

**1/07/21/19**— अतोऽन्यानि दोषवन्त्य् अशुचिकराणि भवन्ति १९

## दोषाः③

**1/08/23/03**— दोषाणां तु विनिर्घातो योगमूल इह जीविते । निर्हृत्य भूतदाहीयान् क्षेमं गच्छति पण्डितः ३

**1/08/23/04**— अथ भूतदाहीयान्दोषानुदाहरिष्यामः ४

**1/08/23/05**— क्रोधो हर्षो रोषो लोभो मोहो दम्भो द्रोहो मृषोद्यमत्याशपरीवादावसूया काममन्यू अनात्म्यमयोगस्तेषां योगमूलो निर्घातः ॥ १३ ॥ ५ ॥

**1/08/23/06**— अक्रोधोऽहर्षोऽरोषोऽलोभोऽमोहोऽदम्भोऽद्रोहः सत्यवचनमनत्याशोऽपैशुनमनसूया संविभागस्त्याग आर्जवं मार्दवं शमो दमः सर्वभूतैरविरोधो योग आर्यमानृशंसं तुष्टिरिति सर्वाश्रमाणां समयपदानि तान्यनुतिष्ठन्विधिना सार्वगामी भवति ६

**2/05/12/19**— दोषफलसंशये न तत्कर्तव्यम् १९

**2/05/12/20**— एवमध्यायानध्याये २०

**1/11/31/23**— क्रोधादींश् च भूत-दाहीयान् दोषान् वर्जयेत् २३

**2/08/18/03**— अहविष्यम्, अनृतं, क्रोधं,
येन च क्रोधयेत् ।
स्मृतिम् इच्छन् यशो मेधां स्वर्गं पुष्टिं द्वादशैतानि *(प्राक्तनसूत्रोक्त-सहितानि)* वर्जयेत् ३

## ससङ्कल्पता④

**1/10/29/02**— यः प्रमत्तो हन्ति, प्राप्तं दोषफलम् २

**1/10/29/03**— सह संकल्पेन भूयः ३

**1/10/29/04**— एवमन्येष्वपि दोषवत्सु कर्मसु ४

**1/10/29/05**— तथा पुण्यक्रियासु ५

**2/11/29/01**— प्रयोजयिता मन्ता कर्तेति स्वर्गनरकफलेषु कर्मसु भागिनः १

**2/11/29/02**— यो भूय आरभते तस्मिन्फलविशेषः २

## पतनीयानि④

**1/07/21/07**— अथ पतनीयानि*(←द्विजातिकर्मभ्यो हानिः पतनम्)* ७

**1/07/21/08**— स्तेयम्, आभिशस्त्यं *(←ब्रह्महत्यादिभिर् वक्ष्यमाणैः)*,
पुरुष-वधो, ब्रह्मोज्झं*(=वेद-त्यागः)*,
गर्भ-शातनम्,
मातुः पितुर् इति योनि-संबन्धे सहापत्ये स्त्री-गमनं,
सुरा-पानम्, असंयोग-संयोगः ८

**1/07/21/09**— गुर्वी-सखिं गुरु-सखिं च गत्वा
ऽन्यांश् च पर-तल्पान् ९

**1/07/21/10**— नागुरुतल्पे पततीत्येके १०

**1/07/21/11**— अधर्माणां तु सततम् आचारः ११

**1/10/29/15**— अभीचारानुव्याहारावशुचिकरावपतनीयौ १५

**1/10/29/16**— पतनीयाविति हारीतः १६

## फलम्③

**2/01/02/03**— ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपं वर्णं बलं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यते । तच्चक्रवदुभयोर्लोकयोः सुख एव वर्तते ३

**2/01/02/04**— यथौषधिवनस्पतीनां बीजस्य क्षेत्रकर्मविशेषे फलपरिवृद्धिरेवम् ४

**2/01/02/05**— एतेन दोषफलपरिवृद्धिरुक्ता ५

**2/01/02/06**— स्तेनोऽभिशस्तो ब्राह्मणो राजन्यो वैश्यो वा परस्मिंल् लोके परिमिते निरये वृत्ते जायते चाण्डालो ब्राह्मणः पौल्कसो राजन्यो वैणो वैश्यः ६

**2/01/02/07**— एतेनान्ये दोषफलैः कर्मभिः परिध्वंसा दोषफलासु योनिषु जायन्ते वर्णपरिध्वंसायाम् ७

**2/05/11/10**— धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते जातिपरिवृत्तौ १०

**2/05/11/11**— अधर्मचर्यया पूर्वो वर्णो जघन्यं जघन्यं वर्णमापद्यते जातिपरिवृत्तौ ११

**2/07/16/01**— सह देवमनुष्या अस्मिंल् लोके पुरा बभूवुः ।
अथ देवाः कर्मभिर् दिवं जग्मुर्,
अहीयन्त मनुष्याः ।
तेषां ये तथा कर्माण्य् आरभन्ते
सह देवैर् ब्रह्मणा चामुष्मिंल् लोके भवन्ति ।
अथैतन् मनुः श्राद्ध-शब्दं कर्म प्रोवाच १

-

## वेदः②

**2/04/08/10**— षडङ्गो वेदः १०

**2/04/08/11**— छन्दः कल्पो व्याकरणं ज्योतिषं निरुक्तं शीक्षा छन्दोविचितिरिति ११

**2/04/08/12**— *(आक्षेपः -)* शब्दार्थारम्भणानां तु कर्मणां समाम्नायसमाप्तौ वेदशब्दः *(तेन कल्पोऽपि वेदशब्दवाच्यस् स्यात्)* । तत्र *(६ इति)* संख्या विप्रतिषिद्धा १२

**2/04/08/13**— *(परिहारः - )* अङ्गानां तु प्रधानैरव्यपदेश इति न्यायवित्समयः १३

## वेदाधिकारः③

**1/01/01/06**— अशूद्राणाम् अदुष्टकर्मणाम् उपायनं वेदाध्ययनम् अग्न्याधेयं **फलवन्ति च कर्माणि** ६

# Appendix - +Dyugangā द्युगङ्गा①

## Goals ध्येयानि②

Dyugangā is a work group dedicated to the promotion of ever-victorious Hindu ideals and arts. It's current focus is in presenting important texts for easy study. Long term goal (https://rebrand.ly/dg-archive) is to save texts to last for millennia into the coming post-electronic/ industrial age.

The texts may be presented as

- audio files (eg: MahAbhArata audio book project1),
- as web pages (eg. Apastamba-gRhya-sUtra2, Apastamba-dharma-sUtra3, EkAgnikANDa commentary4, manu-smRti5, raghuvaMsha6, more kalpa-texts7, tattva-texts8, universal subhAShita DB9),
- as dictionaries (eg: stardict10)
- ebooks distributed on various platforms - (eg: vishvasa.github.io/book-pub11, amazon, google play - SVK12 SVT13 का14). Formats include md, pdf (A4, A5), epub, azw3, html, etc.

We distribute these for free, and under a CC BY 4.0 license. (Platforms may levy their fees.) You may subscribe to mail-streams for past and future announcements (dg15, hv16, san17).

The choice of material heavily depends on the special interests of its current lead (vedas, kalpa, purANa-s).

## संस्कृतानुवादः③

द्युगङ्गा नाम कार्यसंस्था - अजेयानां भारतीयपुरुषार्थपरिकल्पनानाञ्च, हिन्दुककलानाञ्च प्रसारणाय वर्तते। तदीयस् स्थूलोद्देशोऽधुना प्रमुखग्रन्थानाम् अध्ययनसौकर्याय प्रस्तुतिः। ततो ग्रन्थ-सङ्कलन-केन्द्रम् इति वक्तुम् अलम्। दूरोद्देशस् तु (https://rebrand.ly/dg-archive) आधुनिक-शिला-तैल-युगात् परम् अपि सहस्राधिक-वर्षाणि यावद् ग्रन्थ-रक्षा।

ग्रन्थानाम् प्रस्तुतिर् ध्वनिसञ्चिकाभिस् स्यात् (यथा महाभारतपारायणप्रसारणे18), जाल-क्षेत्र-पृष्ठैर् वा (यथा विश्वासस्य मन्त्रटिप्पनीषु19, एकाग्निकाण्डटीका20), शब्द-कोशैर् वाऽपि (stardict21)। इमे ऽस्मत्-पक्षतो मुक्त-रीत्या प्रसार्यन्ते। सद्यश्च ग्रन्थाः संस्थाग्रण्या रुचिविशेषम् अनुसृत्य चिताः - वेदाः, इतिहास-पुराणानि, कल्प-वेदाङ्ग-ग्रन्थाश् चेति।

## Contribution, contact③

अस्मत्-सम्पर्कः - @gmail - vishvas.vasuki, ९५९१२ ६८५०६ (see contact page on our website22)। Serious volunteering, donations and sponsorship are welcome - they help offset operating costs (eg. worker payments, book distribution) and plan further projects. Project-specific sponsorship opportunities are occasionally advertised on our social media accounts and on certain mailing lists.

## वन्दनीय-वन्दना②

(अनेनोद्यमेन नैषां महतां साक्षात् सम्बन्ध ऊह्यः ।)

इञ्जिमेडु-यति-सिंह-**रक्षितो**
राजगोप--बुध-गोप-**चारितः**।
सिंह-लक्ष्म-नर-नाम-भाग् **बभौ**
दिव्य-सूक्ति-वन-मार्ग-**नायकः**॥

यद्-आचार-स्वभावाभ्यां
"ज्ञेयम् अस्त्य् अत्र वैष्णवे"।
इति निष्कर्ष-जिज्ञासे,
**नौमि** तं श्री-नृसिंहकम्॥

---

1. https://sanskrit.github.io/groups/dyuganga/projects/audio/mbh-audio/

2. https://vishvasa.github.io/vedAH_yajuH/taittirIyam/sUtram/ApastambaH/gRhyam/sUtra-TIkAH/

3. https://vishvasa.github.io/vedAH_yajuH/taittirIyam/sUtram/ApastambaH/dharma-sUtram/sarva-prastutiH/

4. https://vishvasa.github.io/vedAH_yajuH/taittirIyam/sUtram/ApastambaH/gRhyam/ekAgnikANDam/sarva-prastutiH/

5. https://vishvasa.github.io/kalpAntaram/smRtiH/manuH/sarva-prastutiH/05/

6. https://vishvasa.github.io/kAvyam/laxyam/padyam/kAlidAsaH/raghuvaMsham/sarva-prastutiH/01/

7. https://sanskrit.github.io/groups/dyuganga//projects/text/proofreading/kalpa-texts/

8. https://sanskrit.github.io/groups/dyuganga//projects/text/proofreading/tattva-texts/

9. https://subhashita.github.io/saMskRtam/padyam/random/

10. https://sanskrit-coders.github.io/dictionaries/offline/stardict

11. https://vishvasa.github.io/book-pub

12. https://play.google.com/store/books/series?id=EeyGHAAAABCW8M

13. https://play.google.com/store/books/series?id=deyGHAAAABDy8M

14. https://play.google.com/store/books/series?id=EuyGHAAAABCV8M

15. https://groups.google.com/g/dyuganga

16. https://groups.google.com/g/hindu-vidya/

17. https://groups.google.com/g/samskrita

18. https://sanskrit.github.io/groups/dyuganga/projects/audio/mbh-audio/

19. https://vishvasa.github.io/vedAH_sAma/paravastu-saama/devaH/agniH/mahAvaishvAnara-vratam/

20. https://vishvasa.github.io/vedAH_yajuH/taittirIyam/sUtram/ApastambaH/gRhyam/ekAgnikANDam/sarva-prastutiH/1_01a/

21. https://sanskrit-coders.github.io/dictionaries/offline/stardict

22. https://sanskrit.github.io/groups/dyuganga/contact/

# Table of Contents


ॐ 9

+क्रिया: 10

अध्ययनम् 10

औचित्य-विवेकः 10

क्वानध्यायः 10

काल-निमित्तकम् अनध्ययनम् 10

घटनानिमित्तम् अनध्ययनम् 11

मृताशौचे 11

अन्ननिमित्तम् 11

उपप्लवे 12

उपप्लवे नैसर्गिके 12

सपरिहार-व्यवधानानि 13

स्थानम् 14

क्रमः 15

+अर्हणम् 15

आतिथ्यम् 15

अतिथिः 15

विधिः 16

विधौ पात्रभेदात् सत्कारभेदः 17

मधुपर्कः 17

लोपे प्रायश्चित्तम् 17

अनुव्रजनम् 18

अतिथिभावः 18

अभिवादनम् 18

अग्नौ चर्या 20

हविर्-विवेकः 20

समिधि पोषणे 20

अग्नेर् हरणम् 20

स्थापनम् 20

स्थालीपाकतन्त्र उल्लेखनम् 20

पात्र-विवेकः 20

गौरव-दर्शनम् 21

दानम् 21

विधिः 21

द्रव्याणि 21
पत्नी-पात्रम् 21
सन्दर्भः 22
प्रतिग्रह-पात्रता 22
ब्राह्मण-भोजनम् 22
अन्यत्रोक्तम् 22
गौरव-दर्शनम् 22
पथि अवकाश-दानम् 23
अतिक्रमणम् 23
भाषणे 23
उपसर्पणे 23
देहस्थितिः 24
उपवेशनम् 24
इतरेषु व्यवहारः 25
समावृत्तस्य गुरौ 25
यज्ञोपवीतम् 27
सन्ध्यावन्दनम् 27
श्राद्धम् 27
फलम् 27
पात्राणि 27
कालः 28
द्रव्याणि 29
विधिः 30
नित्य-श्राद्धम्, तेन श्राद्धान्त्यम् 31
गौरसर्षप-श्राद्धम् पौष्टिकम् 31
स्थालीपाक-श्राद्धम् पौष्टिकम् 32
वैश्वदेवम् 33
चोदनम्, फलम् 33
व्रतग्रहणम् 33
विधिः 33
आतिथ्यम् 36
यज्ञः 36
भिक्षा 36
भिक्षाग्रहणम् 36
भिक्षा-निवेदनम् 36
भिक्षा-कारण-परीक्षा 37
भोजनविधिः 37

- भोजन-मात्रा 37
- भोजनस्थानम् 37
- भोजनपात्रम् 38
- भोजन-वेला 38
- विधिः 38
  - अन्ते शोधनम् 39
- उच्छिष्टे 39
- भोज्यता द्रव्यजन्या 39
  - उत्तमः कल्पः 39
  - अभोज्येषु 39
  - विपदि 41
- भोज्यता परिकरजन्या 41
  - पाचक-परिवेषक-पङ्क्त्यादौ 41
  - पाके 42
  - दातरि 42

ब्रह्मयज्ञः 44
- विधानम् 44
- क्रमः 44
  - रात्रौ 45

दीवनम् 45

लोकसङ्ग्रहः 45

मैथुनम् 45
- विधिः 45
- कालनियमाः 46
- नित्यकर्मत्वम् 46
- पात्रनियमः 46
- ऊर्ध्वरेतः-प्रशंसा-निन्दने 46

निद्रा 47
- सन्ध्या-निद्रा-प्रायश्चित्तम् 47
- दुःस्वप्ने 47

प्रयाणम् 48
- विधिः 48
- वर्जनीय-स्थानानि 48
- यानेषु 48

+शौचम् 48
- आत्मा 48
  - चोदनम्, फलम् 48

आत्मा 49
सन्न्यास-नियमाः 49
योग-विधिः 50
दण्डनम् 50
साधारण-दण्डन-विधिः 50
ब्राह्मण-दण्डनम् 50
स्तेये 51
स्तेनः (ब्रह्मस्वापहारः) 51
पतनीये दण्डः 51
अगौरव-दर्शने 52
इन्द्रिय-नियमनम् 52
स्पर्शे 52
गमने 52
पादस्थितौ 53
क्रियान्तराणि 53
मूत्र-निष्कासनम् 53
ष्ठेवनम् 54
नियमाः 54
नियमाः 54
व्रतानि 54
पर्व 55
गृहस्थेषु 55
प्राणायामः 55
प्रायश्चित्तम् 55
साधारण-विधिः 56
पतनीयेषु 56
सुरा 56
वाग्दोषे 56
मिथ्याधीतौ 56
अपपात्र-संसर्गे 57
शूद्रसेवा 57
अन्यदोषेषु 57
अभोज्यभक्षणे 58
यभनमूलेषु 58
दाम्पत्य-व्यतिक्रमः 58
अवकीर्णी ब्रह्मचारी 59
अनार्यागमनम् / अनार्यगमनम् 59

परदारा-गमनम्, कुमारी-गमनम् 59
गुरुतल्पगमनम् 60
हत्यायाम् 60
ब्रह्महत्या-पैशुनयोः 60
अन्य-हत्यायाम् 62
भ्रूणहा 62
जनवधे 62
प्राणिहत्यायाम् 62
प्रयतता 63
आवश्यकता 63
उचिता आपः 63
शरीरस्थितिः 63
विधिः 63
स्नानम् 64
वाणिज्यम् 64
वाणिज्य-वस्तुषु नियमाः 64
कैस् सह वाणिज्यम्? 65
कीनाशः, पशुपः 65
पशु-दण्डनम् 65
उञ्छवृत्तिः 66
वासः 66
वाक्-नियमनम् 66
पावित्र्ये 66
परुष-वचने 66
वचन-शैल्याम् 66
प्रशंसायाम् 67
साक्षिवचने 67
वादेषु 67
सभाः 67
वस्त्राणि 67
द्रव्यम् 67
यज्ञोपवीतम् 68
विधिः 68
विवादः 68
निर्णेतारः 68
साक्षि-वचनम् 68
निर्णय-विधानम् 68

युद्धम् 69
+पात्राणि 70
आचार्यः 70
वर्णः 70
परीक्षा 70
समावर्तने 71
व्रतविशेषः 71
+आश्रमः 71
ब्रह्मचर्यम् 71
गुरुकुले वासः, ब्रह्मचर्य-कालः 71
वेषः 72
मेखला 72
दण्डः 72
कौपीनम्/ वेष्टिः 72
उत्तरीयम्, कम्बलः 73
ब्रह्मचर्ये नियमाः साधारणाः 73
अध्ययने 73
विनोद-त्यागः 74
आचार्यप्रमादे 75
शुश्रूषा 76
निद्रा 76
समिदाधानम् 77
भोजनम् 77
भोजनात् परम् 77
भोजनात् प्राक् 78
अभोज्यम् 78
गुरुदक्षिणा 79
गृहस्थ-धर्मः 79
भोजनम् 79
जलरक्षणम् 79
अध्ययन-गौणत्वे 79
भृत्याः 80
नियोगः 80
पर्व-नियमा, मैथुन-नियमा 80
पत्नी 80
पत्नीत्व-सिद्धिः 80
सहत्वम् 81

स्त्री-व्यभिचारे 81
समावृत्तः 82
गुरौ गौरवदर्शने 82
वेषः 82
आचार्यस्य तस्मिन् वृत्तिः 83
उपनयनम् 83
परिचयः 83
कालः 83
अतिक्रान्ते काले 84
अनुपनीतकुलस्य 84
वानप्रस्थः 87
अधिकारः 87
प्रव्रजनम् 87
विधिः 87
भोजनम् 88
विवाहः 89
कन्यादाने निषेधाः 89
विवाहप्रकाराः 89
विवाह-विधिः 89
पुत्रः 89
प्रजा-प्रशंसा 89
प्रजा-पाप-फलम् 90
स्त्री-व्यभिचारे 90
राजा 91
पुर-व्यवस्था 91
दानम्, पोषणम् 91
आयुध-मनोरञ्जन-निरोधः 91
रक्षा 91
करः 92
पशु-रक्षणम् 92
+तत्त्वानि 94
ॐकारः 94
अशौचम् 94
बाल-प्रयतता 94
अशौच-कारणानि 94
मृताशौचम् 95
अनध्यायः 96

वपनम् 96
अन्यत्रोक्तानि 96
चौक्षता 96
दायभागः 96
अधिकारिणः 96
चोदनम् 97
धर्मः 97
साधारण-धर्माः 98
आश्रमाः 98
वर्णः 98
ब्राह्मणवृत्तिः 99
क्षत्रिय-वृत्तिः 99
शूद्रधर्मः 99
सम्बद्धविषयाः 99
धर्मे प्रमाणम् 99
शिष्टाचारे स्मृत्यन्तरे च 100
देश-कुलाचारेषु 100
स्त्री-शूद्राश्च 101
कामः 101
पापम् 101
कामस्यापायः 101
अशुचिकराणि 101
दोषाः 102
ससङ्कल्पता 102
पतनीयानि 103
फलम् 103
वेदः 104
वेदाधिकारः 104
Appendix - +Dyugangā द्युगङ्गा 105
Goals ध्येयानि 105
संस्कृतानुवादः 105
Contribution, contact 105
वन्दनीय-वन्दना 106